नं० ९४६-च

न्यायमुक्तावली - (न्यायशास्त्रम्)

पत्राणि ४६ (सम्पूर्णम्)

नं० ५४६-च

नं० ६४६–क.

न्याय सिद्धान्त मुक्तावली (न्यायशास्त्रम्)

पत्राणि ५६ (सम्पूर्णम्)

लीलाति इदं विशेषणं नातः समाप्तपुनरात्तत्वदोषः समाप्तपुनरात्तत्वं वाक्ये समाप्तपुनरात्तत्वं विशेषणोपादानं प्रत्यर्थः यथा त्रैलोक्यरक्षकार्मुकस्य
सुरतक्रीडापिकीनां रवो … मंजरी मधुलिहा लीलाचकोरी … तन्मात्रं … चुलिकापत … ललत्कं … कलाः … प्रेमतनो
नु … सा पवमानसुतः … तिसमाप्तमेव वाक्यं नवदय इत्यादि विशेषणोपादानं … निराकांक्षत्वं … वीजम् १

१

न्या॰ मु॰

प्रतियोग्यधिकरणत्वाभाव

ॐ स्वस्ति श्रीगणेशाय नमः श्रीगुरवे नमः वाग्देवतायै नमः चूडामणी
कृतविधुर्वलयीकृतवासुकिः भवो भवतु भव्याय लीलाताण्डवपण्डितः १
सद्द्रव्या गुणगुंफिता सुकृतिनां सत्कर्मणां ज्ञापिका सत्सामान्यविशेष
नित्यमिलिताऽभावप्रकर्षोज्वला विष्णोर्वक्षसि विश्वनाथकृतिना सि
द्धांतमुक्तावली विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् २
निजनिर्मितकारिकावली मतिसंक्षिप्तचिरंतनोक्तिभिः विशदीकरवा
णि कौतुकान्ननु राजीवदयावशंवदः ३ विघ्नविघाताय कृतं मंगलं शि
ष्यशिक्षायै निबध्नाति नूतनजलधररुचये गोपवधूटीदुकूलचौराय
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥१॥ ननु मंगलं न विघ्नध्वं
सं प्रति न वा समाप्तिं प्रति कारणं विनापि मंगलं नास्तिकादीनां ग्रंथे निर्विघ्न

१ टिप्पोगनुपवाध्यते

मालिपदे … धनभाव … समवायसंबन्धेन … वा संबन्धेन … गुणपदे … कभावः … इति … दयो … नाम … देनार्थः ॥

कुतुकान्ननु … त्यर्थः … कौतुकादिवत्यर्थः … इति भावः २

तत्तेनेति … तत्सत्त्वे तत्सत्त्वमन्वयः … व्यतिरेकः … घटादिकारणत्वं … तत्रान्वयव्यतिरेकौ … विशेषण … नेन विशेष
…भावस्य … विघ्नध्वंसः … समाप्तिप्रतिमंगलस्य कारणत्वे … विनापि … व्यतिरेकव्यभिचारः … मंगले … अन्वयव्यभिचार … दोषः
… मंगलाभावात् समाप्तेश्च सत्त्वात् … व्यभिचार … दर्शनात् … त्वयि मंगले समाप्त्यभावाद्व्यतिरेकदृष्ट्या … १०
दर्वा २

मंगलं समाप्तिफलकं समाप्त्यनाफ
लकत्वे सति सफलत्वात् इत्यनापे
क्षितं सफलत्वं साधयति फलकाङ्क्षः
मंगलं सफलं अविगीतशिष्टा
चारविषयत्वात् दृष्टादिवत् =१
निर्विघ्नेयस्यो मे परिसमाप्यता
मिति कामनया कृतत्वात् =२

परिसमाप्तिदर्शनात् च अतिवेद अविगीतशिष्टाचारविषयत्वेन मंगल
स्य सफलत्वे सिद्धे तत्र च फलजिज्ञासायां संभवति दृष्टफलकत्वे दृष्टफले
कल्पनाया अन्याय्यत्वात् उपस्थितत्वात् समाप्तिरेव फलं कल्प्यते यत्र
यत्र मंगलं न दृश्यते तत्रापि जन्मान्तरीयं कल्प्यते यत्र च सत्यपि मंगले स
माप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यं प्रचुर
स्यास्यैव बलवत्तरविघ्ननिवारणे कारणत्वेन बोध्यम् विघ्नध्वंसस्तु मंग
लस्य द्वारमित्याहुः नव्यास्तु मंगलस्य विघ्नध्वंस एव फलं समाप्तिस्तु
बुद्धिप्रतिभादिकारणकलापात् न चैवं स्वतःसिद्धविघ्नविरहवता कृ
तस्य मंगलस्य निष्फलत्वापत्तिरिति वाच्यं इष्टापत्तेः विघ्नशंकया तदा
चरणात् न चैवं शिष्टाचारात् न वेदविधिफलत्वं तद्बोधकवेद
प्रमाणम् मंगलं तु विघ्नविध्वंसविशेषकारणं विघ्नध्वंसविशेषत्व

मंगलसमाप्त्योः कार्यकारणभा
वे सिद्धे च =३

प्रायश्चित्तपापनाशयोः कार्य
कारणभावबोधकेत्यर्थः =२

तति विघ्नेतल्लाशुस्यैव वेदबोधितत्वात् अत एव पापप्रमेण क तस्य प्रायश्चित्तस्य निष्फलत्वे चारात् तु न० मंगलविघ्नध्वंसयोः कार्यकारणभावबोधकेत्यर्थः
पि न तद्बोधकवेदप्रामाण्यं १० स्वध्वंसप्रतिबन्धो मित कारणत्वादेव =१ तथापि तमोवा विघ्नध्वंसकामो वा मंगलमाचरेदिति मनमे देनस्मुति नीया =२
प्रति

२
न्या॰ मु॰

विनापक्वलत्वपाठादि विघ्नविघ्नात्यंताभाव एव समाप्तिसाधनम् प्रतिबंधक
संसर्गाभावस्यैव कार्यजनकत्वात् इत्थंच नास्तिकादीनां ग्रंथेषु जन्मांतरीयमंग
लजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यंताभावो वास्तीति न व्यभिचार इत्याहुः सं
सारेति । संसार एव महीरुहो वृक्षस्तस्य बीजाय निमित्तकारणाय एतेने श्वरे त्यर्थः
प्रमाणं दर्शितं भवति तथाहि क्षितिः सकर्तृका कार्यत्वात् घटवत् यथा घटादि
कार्यं कर्तृजन्यं तथा क्षित्यंकुरादिकमपि न च तत्कर्तृत्वमस्मदादीनां संभवति अतस्त
त्कर्तृत्वेनेश्वरसिद्धिः न च शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्ष इति वा
च्यं अप्रयोजकत्वात् मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवानुकूलस्तर्कः
द्यावाभूमी जनयन्देव एको विश्वस्य गोप्ता भुवनस्य कर्ता इत्यादय आगमाश्च
प्यनुसंधेयाः ॥२॥ द्रव्यं गुणास्तथा कर्म सामान्यं सविशेषकं समवायस्तथा
भावः पदार्थाः सप्त कीर्तिताः ॥२॥ सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्रा
प्तं तेन भावत्वेन पृथगुपन्यासो न कृतः एते च पदार्था वैशेषिकप्रसिद्धाः

मपि
क्षित्यंकुरादिकं कर्तृजन्यं कार्य
त्वात् घटादिवत्

सत्प्रतिपक्षासाधकत्वात्

पदार्थान्विभजते २
पदस्यार्थः पदार्थः पदशक्ति तत्पदत्व
प्रयोज्यपदार्थत्वे तत्त उपस्थितिविष
यत्वं पदार्थः तथा च पदशक्तिजन्यो
पस्थितिविषयत्वं पदार्थसामान्य
लक्षणमिति फलितम्

संयोगापेक्षपाकर्मसंयोगातिरिक्तत्वं नास्तीति प्रभाकरमतं
निराकर्तुं तथेत्युक्तं यथा गुणाः पृथक्पदार्थाः तथा कर्मापीत्यर्थः ३

प्रतिबंधके उद्देश्यतावच्छेदके च विधेयान्वयः २

अभावो ऽधिकरणात्मक एवेति प्रभाकरमतं दूष
यितुं पुनस्तथेत्युक्तं अग्रे वक्ष्यते

त्यर्थः
हेतुस्तु सत्प्रतिपक्षोपि देवा
कर्तृत्वाभावात्
न च क्षित्यंकुरादिकं कर्तृजन्यं
शरीराजन्यत्वात् आकाशादि
वदिति वाच्यं तत्र शरीरजन्यत्वो
पाधिविशिष्टत्वेन सत्प्रतिपक्ष
व्यभिचरितत्वात् तत्र क्षित्यादीनां
हि शरीराजन्यत्वे च कर्तृज
न्यत्वम् २ स्यैव च
त्रिशवाम्

नैयायिकानामप्येवं विरुद्धाः प्रतिपादितं चैवं भाट्टैरत एवोपमानं प्रमाणं सप्तपदार्थभिन्न
तयाशक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशंकिनम् ननु कथमेत एव पदार्थाः शक्ति
सादृश्यादीनामप्यतिरिक्तपदार्थत्वात् तथाहि मण्यादि [illegible] समवहितेन व
ह्निनादाहो न जन्यते तच्छून्येन तु जन्यते तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्ना
श्यते उत्तेजकेन मण्याद्यपसारणेन च जन्यते इति कल्प्यते एवं सादृश्यमप्यतिरिक्त
पदार्थस्तद्भिन्नषट्स्वभावेष्वन्तर्भवति सामान्येपि सत्वात् यथा गोत्वं नित्यं तथाश्व
त्वमपीति सादृश्यप्रतीतेः नाप्यभावे सत्त्वेन प्रतीयमानत्वात् इति चेन्न मण्या

२
न्या॰मु॰
3

कीरत्वसनीभूताभावप्रतियोगि
त्वंप्रतिबंधकत्वम्

वा१५
द्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति मण्यभावादेरेवं त्वातं त्र्येण हेतुत्वं कल्प्यते
अनेनैव सामंजस्ये अनंतशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात् नचोत्तेजके
सति प्रतिबंधकसद्भावेपि कथं दाह इति वाच्यम् उत्तेजकाभावविशिष्टमण्यभावस्य
कारणत्वात् सादृश्यमपि न पदार्थांतरं किंतु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं ।
सादृश्यं यथा चंद्रभिन्नत्वे सति चंद्रगताह्लादकत्वादिमत्त्वं मुखे चंद्रसादृश्यमिति ॥२॥
क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः । द्रव्याण्यथ गुणा रूपं रसो गंधस्ततः
१२
परम् ३ द्रव्याणि विभजते क्षितीति क्षितिः पृथिवी आपो जलानि ते
त्वयः
२
स्पर्शम्

उत्तेजकाभावविशिष्टमणि: प्रतिबंधक:
तद्रहित: कारणं स च त्रिविध: विशेष
णाभावप्रयुक्त: विशेष्याभावप्रयुक्त
उभयाभावप्रयुक्तश्च तत्र उत्तेजकस
त्त्वे: सत्त्वे विशेषणाभावप्रयुक्त: उभ
योरभावे विशेष्याभावप्रयुक्त: तेज
कसत्त्वे मण्यभावे च उभयाभावप्रयुक्त:

समप:१ ...

जोवद्व्यादिः महद्वायुः व्योमआकाशं कालः दिग्दिही आत्मा मनः एता
न्नवद्रव्याणीत्यर्थः ननु द्रव्यत्वजातौ किं प्रमाणं नहि तत्र प्रत्यक्षं प्रमा
संयोगस्य केषांचिन्मते नित्यत्वादाह विभागस्येति
णं घृततेजःप्रभृतिषु द्रव्यत्वाग्रहादिति चेन्न कार्यसमवायिकारणताव
च्छेदकतया संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्य
जाति ३४ त्वसिद्धेरिति ननु दशमं द्रव्यं तमः कुतो नोक्तं तद्धि प्रत्यक्षेणा गृह्यते तस्य
२६
तमः खलु चलं नीलं परापरविभाग वत्प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति १
च रूपवत्वात् कर्मवत्वाच्च द्रव्यत्वं तच्च गंधशून्यत्वान्न पृथिवी नीलरू
पवत्वाच्च न जलादिकम् तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारणमिति चेन्न

कार्यसमवायिकारणतासंयोग स्यवासमवायिकारणताविभाग स्यवासमवायिकारणता किंचि द्धर्मावच्छिन्नाकारणतात्वात्पर निष्ठकार्यतानिरूपितदंडनिष्ठका रणतावत्

.४
न्या॰मु॰

आवश्यकत्वे तेजोभावेनैवोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात् रूपव।
त्ताप्रतीतिस्तु भ्रमरूपा कर्मवत्ताप्रतीतिरपि आलोकापसरणौपाधिकी भ्रां
तिरेव तमसोतिरिक्तत्वेन तावयवादिकल्पनागौरवं च स्यात् सुवर्णस्य यथा
तेजस्यन्तर्भावस्तथाग्रे वक्ष्यते गुणान्विभजते स्पर्शः संख्यापरमितिः पृथ
क्त्वञ्च ततः परं संयोगश्च विभागश्च परत्वञ्चापरत्वकम् बुद्धिः सुखं दुः
खमिछा द्वेषो यत्नो गुरुत्वकम् द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ५
अथ गुणा इति एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कंठतश्च श

रूपरसगंधस्पर्शाः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखेच्छाद्वेषौ प्रयत्नाश्च गुणाः
संख्या १७

४
शिवोम्

द्रव्यकर्मभिन्नत्वे सति सामान्यवति पाकारणतानाश्रयः किंचिद्धर्मावच्छिन्ना
कारणतानात्वा ६ दनिष्ठकारणतावत्

वेदत्वदर्शिनः तत्र गुणत्वजातिसिद्धिरग्रे वक्ष्यते कर्माणि विभजते उत्क्षेप।
णं तथा(प)वक्षेपणमाकुंचनं तथा प्रसारणं च गमनं कर्माण्येतानि पंच च ६

प्रत्यक्षप्रतीतिरूपप्रत्यक्षप्रसिद्धा...

कर्मत्वजातिस्तु प्रत्यक्षप्रसिद्धा एवमुत्क्षेपणादिकमपि ननु भ्रमणादिकम
पि कर्माधिकं तत्कुतो नोक्तमत आह ६ भ्रमणं रेचनं स्यंदनोर्द्ध्वज्वलनमेव
च तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते ७ सामान्यं निरूपयति सा। लभ्य ३ द्वि: पाठः ४
मान्यं द्विविधं प्रोक्तं परं चापरमेव च द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयो
च्यते ८ परभिन्ना तु या जातिः सैवापरतयोच्यते द्रव्यत्वादिकजातिस्तु परा

त्वं लोकारे स्थितद्वैजात्येन वैजात्यं न स्येके व्यक्तिला न्व्यापिति खिलजातिष्वेक वैजा[illegible]ा मुक्तिः४

५ 5

न्या॰ मु॰

व्यक्तेरभेदः एकव्यक्तिरूपत्वमाकाशत्वादेर्जातित्वे बाधकं तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं घटत्वकलशत्वादीनां भेदे वस्तुतस्तु तुल्यत्वं तुल्यव्यक्ति॰ त्वं स्वा॰ जातिसमनियतत्वं किं तिपावत् तत्तु जातिबाधकमेवेति ध्येयम् संकरश्च परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशो भूतत्वादेर्जातित्वे भूतत्वं विहाय मनसि वर्तमानस्य मूर्तत्वस्य मूर्तत्वं विहाय गगने वर्तमानस्य भूतत्वस्य चवृत्तित्वाद्वा ॥ दिव्यनुष्ठये हत्वात् अनवस्था तु जातेर्जातिमत्त्वे यद्यपि निखिलजातिष्वेक वैजात्यं तद्द्वैजात्यं तदाश्रयजातिषु वर्वैजात्यमेवमप्रयोजकत्वान्न वस्था बोध्या रूपहानिः निःसामान्यत्वगर्भलक्षणव्याघातः रूपविशेषस्य जातिमत्त्वे स्वरूपस्य हानिः व्यावर्तकत्वस्य हानिः तत्र जातिस्वीकारे तयोर्वर्तकत्वं कार्यं सामान्याश्रयस्य सामान्यस्य

परतयोच्यते ६ सामान्यमिति नन्वलक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वं अनेकसमवेतत्वं संयोगादीनामप्यस्ति अत उक्तं नित्यत्वे सतीति नित्यत्वे सति समवेतत्वं गगनपरिमाणादावप्यस्ति अत उक्तमनेकेति नित्यत्वे सत्यनेकवृत्तित्वं अत्यन्ताभावस्याप्यस्ति अतो वृत्तिसामान्यं विहाय समवेतत्वमुक्तम् एकमात्रव्यक्तिवृत्तिस्तु न जातिः तथा चोक्तम् व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः रूपहानिरसंबंधो जातिबाधकसंग्रहः द्रव्यत्वादीति द्रव्यत्वादिवृत्तजातिरिति परत्वमधिकदेशवृत्तित्वं अपरत्वमल्पदेशवृत्तित्वं सकलना

त्वा जातात्०

नन्वेतल्लक्षणमाकाशादिव्याप्तेनैकमनेकसमवेतत्वाभावादित्याशंक्याह लक्षणत्वेनोक्तस्याहुः रूपमिति नित्यत्वे भेदरूपबाधकसत्त्वादिति शेषः अतएव तत्र जातिकल्पिकापात्रभावादिति भावः ननु व्यक्त्या दूस जातिबाधकत्वमेवासिद्धं तिः सामान्यत्वे सति विशेषान्यत्वे सति समवेतत्वस्य जातिलक्षणत्वादित्यतः संमतिमाह तथा चोक्तमिति द्रव्यादिरपाक्तलमुदयनाचार्यैरिति शेषः वह्निवृत्तेकधर्मस्यैव सामान्यत्वात्त्याम्यसिद्धत्वादेकव्यक्तौ जातिरनभ्युदयेति भावः

५

शिवोम्

वर्तकं कार्यं सामान्याश्रयस्य सामान्यस्य वृत्तेरेव विशेषयोरभेदसाधकत्वं संभवति व्यभिचारात् तादृशानिपमानंगीकारे परमाण्वन्तेकत्वादीनां तत्तद्व्यक्तित्वेनैव परस्परभेदसाधकत्वनियमात् नन्वसामान्यरूपेणैव विशेषयोरभेदसाधकत्वं संभवेन विप्रोषस्य वैपर्थ्यप्रसंगादितिउक्तात्पः असंबंधप्रतियोगितानुयोगितान्यतरसंबंधेन समवायाभावः समवायाभावयोर्जातिमत्त्वे इति

त्वापेक्षयाधिकदेशवृत्तित्वात् सत्तायाः परत्वं तदपेक्षया चान्यासां जातीनाम्
परत्वं ९ व्यापकत्वात्पराऽपि स्याद्व्याप्यत्वादपराऽपि च ॥ अंत्यो नित्यद्रव्यवृ
त्तिर्विशेषः परिकीर्तितः ॥ १० पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृ
त्तित्वात् द्रव्यत्वस्य परत्वम् सत्तापेक्षया व्याप्यत्वादल्पदेशवृत्तित्वात् द्रव्यत्व
स्यापरत्वम् विशेषं निरूपयति अंत्येति अंते अवसाने वर्तते इति अंत्यः
यदपेक्षया विशेषो नास्तीत्यर्थः घटादीनां द्व्यणुकपर्यंतानां तत्तदवय
वभेदात्परस्परं भेदः परमाणूनां परस्परं भेदको विशेष एव स तु स्व[?]तः ॥

६
न्या॰मु॰ 6

वव्यावृत्तः तेनतत्रविशेषांतरापेक्षानास्तीत्यर्थः ॥ समवायं दर्शयति॥ घ
चकारेणनित्यद्रव्येषु विशेषसंबंधः समुच्चीयते
टादीनांकपालादौद्रव्येषुगुणकर्मणोः तेषुजातेश्चसंबंधः समवायःप्रकी
र्त्तितः ॥ घटादीनामिति अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः
क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्चयःसंबंधःससमवायः समवायत्वं
समवायस्यसंबंधत्वेकिंमान नित्यपरीकाकृतत्रप्रमाणमिति
नित्यसंबंधत्वंतत्रप्रमाणंतु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसं
बंधविषयाविशिष्टबुद्धित्वाद्दंडीपुरुषइतिविशिष्टबुद्धिवत् इत्यनुमानम्
मीमांसकानां
द्रव्ययोरेवसंयोग इतिनियमात् तेनसंयोगादिबाधात्समवायसंबंधसिद्धिः नचस्वरूपसंबंधेनसिद्धसाध
६
सावो

ननु समवायस्यैकत्वे किं मानमत आह लाघवादिति तथा च घटपटादित्यंकु
रादिजनकत्वेऽस्य दोलाघवादेक एव सिध्यति तथा च समवायोपीत्यर्थः १

नैयायिकानां

नम[illegible]र्यांतरं वा ऽनन्त स्वरूपाणां संबंधत्वकल्पने गौरवान् लाघवादेकस स्वरूपस्य द्विष्ठत्वाभावेन संबंधत्वाभावाच्च १

रूपप्रतियोगिकस्पर्शप्रतियोगिकसमवायस्यैकत्वात्।

मवायसिद्धिः न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसंगः तत्र रूपस बुद्धेः प्रमात्वप्रसंगः २

तथा च रूपप्रतियोगिकत्वविशिष्टसमवायाभावान्न रूपवत्ताबुद्धिः

यदि वैशिष्ट्यमतिरिक्तं संगीक्रियते तदा
तन्नित्यमनित्यं वेति विकल्प्याद्यं दूषयन्ना
ह ४॥

मवायसत्वेपि रूपाभावात् न चैवमभावस्यापि वैशिष्ट्यसंबंधांतरं सिद्धे

दिति वाच्यं तस्यानित्यत्वे भूतले घटानयनानंतरमपि घटाभावबुद्धिप्र

घटाभावस्येत्यर्थः घटाभावस्यानित्यत्वे घटरूपादेरि

संगात् घटाभावस्य तत्र सत्वात् तस्य च नित्यत्वात् अन्यथा देशांतरेपि

ननु सिद्धान्तेनोपि मते पाकेन रक्ते घटे श्यामरूप
समवायस्य सत्वात् श्यामरूपवत्ताधीप्र
संग इत्यत आह

न प्रतीतिर्न स्यात् वैशिष्ट्यस्य तत्र सत्वात् मैवं ननु घटे पाकरक्ततादशायां

श्यामरूपं नष्टत्वान्न तद्वत्ताबुद्धिः वैशिष्ट्यस्यानित्यत्वे त्वनंतवैशिष्ट्यक।

ननु वैशिष्ट्यानंगीकारे घटाभाववद्भूतलयोः कः संबंधः स्वरूपमिति चेन्न घटतिघटभूत्यतादृशपापत्तिवद्घटवत्तादशायामपि भूतले घटाभाववद्बुद्धिः तवमतेपि स्यात् घटाभाववद्भूतलयोः स्वरूपसंबंधस्य तत्र सत्त्वात् अतआह एवं चेति तत्तद्भूतलादिकमिति
घटाभाववद्भूतलमिति ज्ञानकालीनं यत्र भूतले घटाभाववद्बुद्धिस्तद्भूतलमित्यर्थः तद्भावानामिति पक्ष्यपक्ष्याभावस्य बुद्धिलक्षणत्यर्थः तथा च न स्वरूपसंबंधः किंत्वीदृशसंबंधविशेष इति पूर्वोक्तातिप्रसंग इति भावः १

घटाभाववद्भूतलमिति ज्ञानकाली
नमित्यर्थः

यत्र भूतले घटाभाववत्ज्ञानं तद्भू
तलादिकमित्यर्थः

पक्ष्यपक्ष्याभावस्य बुद्धिलक्ष
त्यर्थः

७ घटवति देशे घट॰ त्यनेनैव गौरवं एवं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां संबंधः

न्यान्तु॰ भावप्रतीत्यव
दये च =१

११ अभावं विभजते अभावस्तु द्विधा अन्योन्यसंसर्गाभाव भेदतः प्रागभावस्त
थाध्वंसोप्यत्यन्ताभाव एव च १२ एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते १२
अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वं संसर्गेति संसर्गाभावान्यो-
न्याभावभेदादित्यर्थः अन्योन्याभावस्यैकविधत्वात्तद्विभागासंभवात्संस
र्गाभावं विभजते प्रागभाव इति संसर्गाभावत्वं चान्योन्याभावभिन्नाभावत्वं
अन्यो न्याभावत्वं तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं विनाश्य

षट्केति द्रव्यत्वाद्यवच्छिन्नप्रतियोगितावच्छेदकमन्यप
न्नात् किंतु तद्भूतघटत्वसंख्यावद्धिप्रतियोगिता
कभेदस्य द्वित्वमिवेति ध्येयम् वस्तुतोभावत्वम
वबोध्यम् ४ पर्याप्तसंबंधावच्छिन्नद्रव्यादिष
ट्कत्वविशिष्टावच्छेदकतानिरूपितप्रतियोगिता
कान्योन्याभावविशिष्टाधेयतानिरूपिताधि
करणतावद्भिन्नत्वमभावत्वमिति लक्ष
णं पर्यवसितम् ४

संयोगावच्छिन्नसंयोगपर्याप्तावेति व्या
प्तिनिरासार्थं तादात्म्यत्वेन तादात्म्ये
ति १

संसर्गश्चान्योन्यं च संसर्गान्योन्ये तयोरभावः
संसर्गाभावोन्योन्याभावः संबंधस्याभावोऽन्यो
न्यस्याभाव इत्यर्थः नात्यन्ताभाव एव लक्ष्यः संस
र्गस्यान्योन्याभावस्य तयोर्भेदलक्षणात् इत्य
र्थः कश्चिदन्योन्याभाव एवलक्ष्यतेत संसर्गान्यो
न्यं च संसर्गान्योन्य तेषामभावो इति कथमेव
देनाभावानस्तपि भाव रूपत्वात् त्रयाणाम
भावानां विशेषणाः न हि कि भिन्नतिभ्यगुसं
सर्गाभावः सर्वेषां येषां नाहं तेषामभावः संसर्गा।
भावः अन्योन्याभावः सर्वेषां येषां नाहं तेषा
भावः अन्योन्याभावस्तपोर्भेदलक्षणादि
त्यर्थः २

ध्वंसे; तिव्याप्तिनिरासार्थं विनाश्येति १

७ शिवोम्

नन्वत्यंताभावस्य नित्यत्वे घटापनयनानंत
रमपि भूतले घटो नास्तीति प्रतीत्यापत्तिरि
त्यत आह यत्रेत्यादिना तथा च संबंधाभावादे
व घटानयनानंतरं घटाभावबुद्धिर्न पुनः
कालविशेषसंबंधविशिष्टस्य रक्तसंसर्गितो
घटपाके घटः [illegible] तिघटो नास्तीति प्रतीत्य
भावे [illegible] चतुर्थसंसर्गाभावेऽत्यंताभा
व इति प्राचां केचिदित्यनेन सूचितम २

भावत्वं प्रागभावत्वं जन्याभावत्वं ध्वंसत्वं नित्यसंसर्गाभावत्वमत्यंताभावत्वम्
यत्र भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटकालसंबंधावघट घटात्यंताभावस्य तत्र तयोः
कत्वाद् अत्यंताभावस्य नित्यत्वेपि घटकालेन घटात्यंताभावबुद्धिः तत्रोत्पादवि
नाशशाली चतुर्थोयमभाव इति केचित् अत्र ध्वंसप्रागभावाधिकरणेऽत्यं
ताभाव इति प्राचां मतम् श्यामघटे रक्तो नास्ति रक्तघटे श्यामो नास्तीति धीश्च
प्रागभावं ध्वंसं चावगाहते तेन न तु तदत्यंताभावैर्विरोधात् नव्यास्तु तत्र विरो तयोः २
धे मानाभावात् ध्वंसादिकालावच्छेदेनाप्यत्यंताभावो वर्तत एवेत्याहुः नन्व

४ ·८

न्या·मु·

दूषयति कल्पनायां ४

नन्वभावाधिकरणात्मकाभावस्वीकारे देष्याधाराधेयभाववदत्रापि सिद्ध्यतीत्यत आह एवं चेति २

स्त्वभावानामधिकरणात्मकत्वं लाघवादिति चेन्न अनंताधिकरणात्मक

त्वेऽपेक्षयातिरिक्तकल्पनाया एव लघीयस्त्वात् एवं चाधाराधेयभावोऽप्युपपद्य

ते एवं च तत्तत्कैवल्यगंधरसाद्यभावानां प्रत्यक्षत्वमप्युपपद्यते अन्यथा तद

धिकरणानां तत्तदिन्द्रियाग्राह्यत्वादप्रत्यक्षत्वं स्यात् तेन ज्ञानविशेषकालवि

शेषात्मकत्वमभावस्येति प्रत्युक्तं अप्रत्यक्षत्वापत्तेः इदानीं पदार्थानां सा

धर्म्यं वैधर्म्यं च वक्तुमुपक्रमते सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते २

समानो धर्मो येषां ते सधर्माणः तेषां भावः साधर्म्यं समानो धर्म इति फ

अभावानामधिकरणत्वे (interlinear)

तत्तदिन्द्रियैः वक्ष्यमाणदूषणेन (interlinear)

एवं चाधिकरणाद्यतिरिक्तत्वे इत्यर्थः अधिकरणात्मकत्वे त्वाधाराधेयभावानुपपत्तिदोषः इत्यर्थः २

परस्परधर्मतया ज्ञानानां सप्तपदार्थानामिवपरस्परभेदकत्वं तापत्तमात् इदानीमिति पदार्थनिरूपणानन्तरमित्यर्थः ३

अधिकरणाद्भिन्नत्वाभावनिरूपणे भूतले घटो नास्तीति ज्ञानविशेषात्मकत्वे ज्ञानस्यातीन्द्रियग्राह्यत्वात् दुर्ग्राह्याभावानां वाह्येन्द्रियग्राह्यत्वं न स्यात् अस्मिन्काले घटो नास्तीति ८ अतीत्याकालविशेषात्मकत्वे कालस्यातीन्द्रियत्वात्तदात्मकस्याभावस्यापि अप्रत्यक्षत्वं स्यात् ४

अभिधाविषयत्वं अभिधात्वहं केतग्राह्योत्पीक पदार्थः इति मीमांसकाः
संकेतभिन्नाया मभिधायां मानाभावात् संकेत एवेति नैयायिकाः ३

विषयभेदेन विषयताभेदे पि ज्ञानविषयतात्वे
न केवलान्वयित्वमत्यवेतिभावः ३ प्राग्
पदेनास्तित्वं तत्तत्कालसंबंधः भावत्वं च
स्मां ताधर्म्यं बोध्यम् ३

लितोर्थः एवं विरुद्धो धर्मो येषां ते विधर्म्माणस्तेषां भावो वैधर्म्यं विरुद्धो
धर्म्म इति फलितोर्थः ज्ञेयत्वं ज्ञानवि[illegible]षयता सा च सर्वत्रैवास्ति ईश्वर[illegible]
अभावाप्रतियोगित्वं केवलान्वयित्वम्
ज्ञानविषयतायाः केवलान्वयित्वात् एवम[illegible]भिधेयत्वप्रमेयत्वादिकं
बोध्यम् १३ द्रव्यादयः पंच भावा अनेके समवायिनः सत्तावंतस्त्रय स्वा
द्यागुणादिर्निर्गुणक्रियः १४ द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यं
इतिभावत्वेर
अनेकत्वं समवायित्वं च यद्यप्यनेकत्वमभावेप्यस्ति तथाप्यनेकत्वे सति भा
फलितोर्थः
वत्वं तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं न द्रव्यः तेन

समवेतत्वाभावे
पि१४ २

तथाचसमवेतवृत्तिपदार्थविभाजकोपाधिमत्वंफलितोऽर्थः तेननित्यद्रव्येषुनाव्याप्तिः त्रुटिः

कौमुदीना१

१ ९ मत्येकंघटादावाव्याप्तिः समवायित्वंचसमवायसंबंधेनसंबंधित्वंननुस
न्या॰मु॰
मवायवत्वंसामान्यादावभावात् सत्तावंतइति द्रव्यगुणकर्म्मणांसत्तावत्व
मित्यर्थः गुणादिति यद्यपिगुणक्रियाशून्यत्वमाद्यक्षणेघटादावतिव्या
प्तं क्रियाशून्यंगगनादावतिव्याप्तं तथापिगुणवद्वृत्तिधर्मत्वंकर्म्म
वद्वृत्तिपदार्थविभाजकोपाधिमत्वंतदर्थः नहिघटत्वादिकंद्रव्यत्वंवा।
गुणवद्वृत्तिकर्मवद्वृत्तिवा किंतुगुणत्वादिकंतथाव्याकाशत्वादिकंतु
नपदार्थविभाजकोपाधिः १४ सामान्यपरिहीनास्तुसर्वेजात्यादयो। ९
शिवोम

मताः परिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् १५ सामान्यानधिकरण
त्वं सामान्यादीनामित्यर्थः पारिमाण्डल्येति पारिमाण्डल्यं अणुपरिमाणं
कारणत्वं तद्भिन्नानामित्यर्थः अणुपरिमाणं तु न कस्यापि कारणं तद्धि
स्वाश्रयारब्धद्रव्यपरिमाणारंभकं भवेत् न चैतत्संभवति परिमाणस्य स्व
समानजातीयोत्कृष्टपरिमाणजनकत्वान्महदारब्धस्य महत्तरत्ववद
[illegible]णुजन्यस्याणुतरत्वप्रसंगात् एवं परममहत्परिमाणं अती
न्द्रियं सामान्यं विशेषाश्च बोध्याः ॥२ आत्ममानसप्रत्यक्षे आत्ममहत्त्व
स्य कारणत्वात् परममहत्परिमाणमाकाशादेर्बोध्यम् तस्यापि न का

अत्राणुपरिमाणं द्व्यणुकपरि॰ स्याकारणस्यापि लाघवात्
केऽप्यमन्यथा न स्पर्शिकारणतया नत्राति व्याप्ति
प्रसंगः ३

८
न्या०मु०

रणत्वमित्याचार्याणामाशयः इत्यर्थः ननु ज्ञानातिरिक्तं प्रत्यकार
णतायाः एवानाचार्यैरुक्तत्वात् इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वं
ज्ञायमानसामान्यं न प्रत्यासत्तिः ज्ञायमानं लिंगं नानुमितिकरणमित्यभि
प्रायेणोक्तं ननु कारणं किमत आह १५ अन्यथासिद्धिशून्यस्य नियता
पूर्ववर्तिता कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितं १६ समवायिका
रणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वं एवं न्यायनयज्ञैस्तृतीयमुक्तं निमि
त्तहेतुत्वं १७ यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत् तत्रास
न्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् १८ अन्यथेति तस्य कार

यदा परमाणुत्वेन सकलपरमा
णूपस्थितिं तदातीन्द्रियसामा
न्यस्यापि कारणत्वं भवत्येव प
रन्तु स्वमतेतीन्द्रियसामान्यं न
प्रत्यासत्तिः किन्तु सामान्यज्ञा
नं न त्याच गतस्याकारणत्वमेव
एवं परमाणुमेदानुमाने ऽ
यं परमाणुः स्वान्यपरमाणोर्भिन्नः विशेषादित्याकारके
ज्ञायमानस्य विशेषस्यैव कारणत्वेन दा भवत्येव कारणताप
रन्तु ज्ञायमानलिंगस्यानुमितिकरणत्वे तु अतीतादिलिंगका
नुमिति न स्यात् अतो लिंगज्ञानमेवानुमितिकरणमिति तथा च

शिवोम्

१०

यद्धर्मावच्छिन्नं यद्धर्मावच्छिन्ने समवायेनोत्पद्य
ते तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नं समवायि
कारणत्वम्

एतस्यासमवायिकारणं लक्षयति यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं ।
तत्रेति समवायिकारणे प्रासन्न प्रत्यासन्नं जनकं कारणं द्वितीयमसमवायिकारणमित्यर्थः
ऽत्र यद्यपि तुरीतंतुसंयोगे पटासमवायिकारणत्वं स्यादेवं वेगादीनामभिघा
ताद्यसमवायिकारणत्वं स्यादेवं ज्ञानादिकमिच्छाद्यसमवायिकारणं स्या
त्तथापि पटासमवायिकारणलक्षणे तुरीतंतुसंयोगभिन्नत्वं देयं तुरीतंतुसं
योगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव एवं वेगादिकं वेगसं
दाद्यसमवायिकारणं भवत्येवेति नन्वकार्यासमवायिकारणलक्षणेन
तद्भिन्नत्वं देयं आत्मविशेषगुणानां तु कुत्राप्यसमवायिकारणत्वं नास्ति

तंतुसमवेतत्वे सति तुरीतंतुसंयोगाद्यन्यत्वे सति पट
कारणत्वं पटासमवायिकारणत्वम् वा तंतुमात्र
समवेतत्वं पटासमवायिकारणत्वम्

॥ न्या॰मु॰ ॥ तेनतद्भिन्नत्वंसामान्यलक्षणंपर्यवसितमेव ॥ असमवायिकारणेप्रत्यासन्नंद्वि
विधं कार्यैकार्थप्रत्यासत्त्याकारणैकार्थप्रत्यासत्त्याच ॥ आद्यंयथाघटादिंप्रति कं

असमवायिकारणम्
दि॰ ३४ कपालसंयोगादिकं तत्रकार्येणघटेनसहकारणस्यकपालसंयोगस्यैकस्मि
न्कपालेप्रत्यासत्तिरस्ति ॥ द्वितीयंयथा घटरूपंप्रतिकपालरूपमसमवायि
कारणं तत्रघटरूपंप्रतिकारणंघटस्तेनसहकपालरूपस्यैकस्मिन्कपालेप्र
त्यासत्तिरस्ति तथाचक्वचित्समवायसंबंधेनक्वचित्स्वसमवायिसमवायसंबं
द्विविधप्रत्यासत्योरस्तिरोषः २ धेनेतिफलितोर्थः ॥ इत्थंचकार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्यासमवा
यिकारणेप्रत्यासन्नंकारणंज्ञानादिभिन्नमसमवायिकारणमितिसामान्य

॥ शिवोम्

नोलक्षणं पर्य्यवसन्नम् ॥ आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भि
न्नं तृतीयं निमित्तकारणमित्यर्थः ॥ इदानीमन्यथासिद्धत्वमेव विवियते।
तदा ह १८ येन सह पूर्वभावः कारणमादायवायस्य ॥ अन्यं प्रति पूर्वभावेज्ञा
ते यत्पूर्वभावविज्ञानम् १९ येनेति यत्कार्य्यं प्रति कारणस्य पूर्ववर्त्तिता येन
रूपेण गृह्यते तेन तत्कार्य्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः ॥ यथा घटं प्रति दं
दिर्क ३ डत्वमिति द्वितीयमन्यथासिद्धमाह ॥ कारणमिति यस्य स्वातंत्र्येणान्वयव्य
तिरेको न स्तः किंतु कारणमादायैवान्वयव्यतिरेकौ गृह्येते तदन्यथासि
द्धं यथा दंडरूपम् ॥ तृतीयमन्यथासिद्धमाह ॥ अन्यं प्रतीति ॥ अन्यं प्रति पूर्वव

१२
न्या॰ मु॰

त्विंगृहीत्वैव यस्य यत्कार्य्यं प्रति पूर्व्ववर्त्तित्वं गृह्यते तेन तस्य तत्कार्य्यं प्रति अन्यथासि
द्धं त्वं यथा घटादिकं प्रत्याकाशस्य आकाशस्य हि घटादिकं प्रत्याकाशत्वेन कार-
णत्वं स्यात् आकाशत्वं तु शब्दसमवायिकारणत्वं अतः शब्दं प्रति जनकत्वं गृही
त्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम् ननु शब्दाश्रयत्वेन तस्य
कारणत्वे का न्यथासिद्धिरिति चेत्त्वं वनीति अथाकाशस्य शब्दं प्रति जनकत्वे
किमवच्छेदकमिति चेत्कवत्वादिकं विशेषपदार्थो वेति चतुर्थमन्यथासिद्ध
माह जनकं प्रतीति ४ जनकं प्रति पूर्व्ववर्त्तितामपरिज्ञाय न यस्य गृह्यते प्र
तीतिन्नमस्यापि यद्भवे नियतावश्यपूर्व्वभाविनः ५ यस्य यत्कार्यजनकं प्र

१२
शिवोम्

ति पूर्ववर्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यं
प्रति अन्यथासिद्धत्वम् यथा कुलालपितुर्घटं प्रति तस्य हि कुलालपितृत्वे
न घटं प्रति जनकत्वेऽन्यथासिद्धत्वम् कुलालत्वेन रूपेण जनकत्वे निष्प्र
पत्तिः कुलालमात्रस्य घटं प्रति जनकत्वात् पंचममन्यथासिद्धमाह
ऽप्रतिसिद्धमिति ऽवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नम
न्यथासिद्धमित्यर्थः ऽत एव प्रत्यक्षे महत्त्वं कारणमनेकद्रव्यत्वमन्य
थासिद्धं तत्र हि महत्त्वमवश्यंक्लृप्तं तेनानेकद्रव्यत्वमन्यथासिद्धम्।
न च वैपरीत्ये किं विनिगमकमिति वाच्यम् महत्त्वजातेः कारणता

ऽन्यतरपक्षपातिनी युक्तिर्हि विनिगमना।

१३
न्या॰ मु॰
13

वच्छेदकत्वेलाघवात् २०॥ एतेपंचान्यथासिद्धादंडत्वादिकमादिमं
घटादौदंडरूपादि द्वितीयमपिदर्शितं २१ तृतीयंतु भवेद्व्योमकुलालज
नकोपरः पंचमोरासभादिःस्यादेतेष्वावश्यकस्त्वसौ २२ रासभादिरि
ति यद्यपि तद्घटव्यक्तिंप्रतिरासभस्यनियतपूर्ववर्त्तित्वमस्ति तथापि
घटजातीयंप्रतिसिद्धकारणभावेदंडादिभिरेव तद्व्यक्तेरपिसंभवे रा
सभोऽन्यथासिद्धइतिभावः एतेष्विति एतेषुपंचान्यथासिद्धेषुमध्येपं
चमोन्यथासिद्धआवश्यकः तेनैवपरेषांचरितार्थत्वात् दंडादिभिरव तथाहि २४
श्य क्लृप्तपूर्ववर्त्तिभिरेवकार्य्यसंभवे दंडत्वादिकमन्यथासिद्धम्

१३
शिवाम्

नचवैपरीत्येकिंविनिगमकमितिवाच्यम् दंडत्वस्यकारणत्वेदंडघटित
परंपरायाःसंबंधत्वेगौरवात् एवमन्येषामप्यनेनचरितार्थत्वंसंभवति २४
समवायिकारणत्वंद्रव्यस्यैवेतिविज्ञेयंस्पष्टंगुणकर्ममात्रवृत्तिज्ञेयमथा
प्यसमवायिहेतुत्वं २५ गुणकर्मेति असमवायिकारणत्वंगुणकर्म
भिन्नानांवैधर्म्यम् ननुगुणकर्मणोःसाधर्म्यमित्यत्राप्येवनतात्पर्यम् सा
धर्म्यप्रकरणेवैधर्म्यकथनमयुक्तमित्याशयादाह अथवेति अथवा
सत्तासाक्षा ज्ञाप्य=२ १ समवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वमर्थः तेनज्ञानादीनामसमवा
यिकारणत्वविरहेपिनाव्याप्तिः २६ अन्यत्रनित्यद्रव्येभ्यआश्रितत्व

२४
न्या॰मु॰

मिहोच्यते दित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता २४ नित्यद्रव्या।

णि परमाणवाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः आश्रित।

दि ३४ त्वं तु समवायसंबंधेन वृत्तिमत्वं विशेषणतया नित्यानामपि कालादौ वृत्तेः इह परमाणुरिदानीं परमाणुरिति प्रतीतेः=१

(कालिकविशेषणतातिरिक्तसमवायादिसंबंधेन वृत्तिमत्वम्) इदानीं द्र

व्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते दित्यादीनामिति २४ दितिर्जलं

तथा तेजः पवनो मन एव च परापरत्वमूर्तत्वक्रियावेगाश्रया अमी २५

पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्वं मूर्तत्वं क्रियावत्वं वेगवत्वं च सा

धर्म्यं न च व्यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्

२४
शिवेन

अविभुर्वृत्तिपरिमाणवत्त्वमित्यर्थः
तेन परमाणोर्नाव्याप्तिः २

साक्षाद्व्याप्येति१ परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वा
त् मूर्त्तत्वमपकृष्टपरिमाणवत्त्वम् तच्चैतेषामेव गगनादिपरिमा
णस्य कुतोऽप्यपकृष्ट[illegible]त्वाभावात् एवं वेगवत्त्वं कर्मस
मानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं वेगवद्वृत्ति द्रव्यत्वव्या वेगवत्त्व४
प्यजातिमत्त्वं वा बोध्यम् २५ कालखात्मदिशां सर्वगतत्वं परमं
महत् इत्यादि पंचभूतानि चत्वारि स्पर्शवंति हि २६ कालेति
कालाकाशात्मदिशां सर्वगतत्वं सर्वमूर्त्तसंयोगित्वं परममह
परममहत्त्वं च त्त्वं च जातिविशेषः अपकर्षानाश्रयपरिमाणत्वं वा इत्यादौ

१५
न्या॰मु॰ 15

ति पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं तच्च बहिरिन्द्रियग्राह्यवि
शेषगुणवत्त्वं आत्मग्राह्यत्वे लौकिकप्रत्यक्षस्वरूपयोग्यत्वे चात्मत्व
तेन ज्ञातो घटः इति प्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात्तद्वति ज्ञानलक्षणप्रत्यासत्त्या विषयत्वात् =२
ज्ञाति मा॰ प्रि॰
आत्मनि नातिप्रसङ्गः नर्वप्रत्यक्षाविषयरूपादिमति परमाणावा।
सर्व प
वव्याप्तिः तस्यापि योग्यत्वान्महत्त्वलक्षणकारणान्तरासन्निधा
नाच्च न प्रत्यक्षत्वं आत्मवाऽऽत्मामाहेति विशेषगुणवत्त्वं भूतत्वं ॥
वत्त्वमीति ॥ पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम् द्रव्यारंभ इति २६
द्रव्यारंभश्चतुर्षु स्यादथाकाशशरीरिणां अव्याप्यवृत्तिःक्षणिको

१५
श्रीराम

विशेषगुणाःस्मृते २७ पृथिव्यप्तेजोवायुषुचतुर्षुद्रव्यारंभकत्वमन
यद्द्रव्यानारंभकेघटादावव्याप्तिः द्रव्यसमवायिकारणवृत्तिद्रव्यत्व सातासाम्येति
व्याप्यजातिमत्वस्यविवक्षितत्वात् अथाकाशशरीरिणामिति।
आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्वं आकाशस्यवि
अवच्छेदकभेदेनत्वसमानाधि
करणत्वंतताभावप्रतियोगित्वं =
शेषगुणः शब्दः सचाव्याप्यवृत्तिः यदाकिंचिदवच्छेदेनशब्दउत्पद्य
तेतदन्यावच्छेदेनतदभावस्यापिसत्वात् क्षणिकत्वंचतृतीयक्षणवृत्ति
धर्माधर्मभावनासंस्कार
वारणाययोग्येति = २
ध्वंसप्रतियोगित्वम् योग्यविभुविशेषगुणानांस्वोत्तरवर्त्तिगुणना
श्यत्वात् प्रथमशब्दस्यद्वितीयशब्देननाशः एवंज्ञानादीनामपि।

९६
न्या॰ मु॰ 16

नट।८

ज्ञानादिकं हि परमात्मनि विभौ शरीरावच्छेदेनोत्पद्यते घटावच्छेदेन नद ध १८
भावोऽस्त्येव एवं ज्ञानादिकं क्षणद्वयस्थायि इत्थं चाव्याप्यवृत्तिविशे
षगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं चार्थः पृथिव्यादौ रूपादिवि
शेषगुणोऽस्तीति नातोऽव्याप्यवृत्तीत्युक्तम् पृथिव्यादावव्याप्यवृत्तिः
संयोगादिरस्तीति विशेष त्युक्तं नच रूपादीनामपि कदाचित्तृ
तीयक्षणे नाशासंभवात् क्षणिकविशेषगुणवत्त्वं दित्यादावति
व्याप्तमिति वाच्यम् चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगु ९६
णवत्त्वस्य तदर्थत्वात् अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति क्षणचतुष्ट शिवराम
चतुःक्षणवृत्तीनि यानि जन्यानि घटादीनि तद्वृत्तिर्या जातिस्तान्ता दितद्वाहगुणो ज्ञानादिः तद्वत्त्वस्यात्मादौ सत्त्वात्
क्षणसमन्वयः २

यं तु न किमपि ज्ञानादिकं तिष्ठति रूपत्वादिकं तु तत्र चक्षुर्ग्राह्यस्यापि न्य
पि रूपादौ वर्त्तत इति तद्व्युदासः ईश्वरज्ञानस्य चक्षुःक्षणवर्त्तित्वात्तत्ता
नत्वस्य तद्वृत्तित्वाज्जन्येत्युक्तं यद्याकाशजीवात्मनोः साधर्म्येन तदाज
न्येति न दोषः द्वेषत्वादिकमादाय लक्षणसमन्वयात् परममहत्त्वस्य
तादृशगुणत्वाच्चतुर्थक्षणे द्वित्वादीनामपि नाशाभ्युपगमात् द्वित्वा
दीनामपि तथात्वात्तद्वारणाय विशेषेत्युक्तम् त्रिक्षणवृत्तित्वं वाच्या
न्या २४ च्यम इच्छादिकमादायात्मनि लक्षणसमन्वयात् रूपद्रवत्वप्रत्यक्ष
योगिनः प्रथमाक्षणः दृश्यद्वेषेनसंहाररूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविष

१प्रथमे एकोयमेक इत्यपेक्षाबुद्धिः प्रथम
क्षणे ज्ञाना द्वितीयक्षणे द्वित्वोत्पत्तिः तृती
यक्षणे द्वित्वज्ञानं चतुर्थक्षणेऽपेक्षाबुद्धि
नाशः पंचमक्षणे द्वित्वनाशः स्वोत्पत्त्यपेक्षा
चतुर्थक्षणे नाशः ४५

चक्षुरादयो रूपवंतः तेज
स्त्वात् महानसस्थवह्निवत् २

१० न्या॰मु॰

यत्वंचेत्यर्थः नच चक्षुरादीनां भर्जनकपालस्थवह्नेरूष्मणश्च रूपवत्वे किं
मानमिति वाच्यम् तत्र तेजस्त्वेन रूपानुमानात् एवं वाय्वानीत पृथि
वीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम् नच
घटादौ द्रुतसुवर्णादिभिन्नतेजसि चक्षुत्ववत्त्वमव्याप्तमिति वाच्यं
द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात् घृतजतुप्रभृ
तिषु पृथिवीषु जलेषु द्रुतसुवर्णादौ तेजसि द्रवत्वसत्वात् तत्र च पृ
थिवीत्वादिसत्वान्नदोषो घटलक्षणसमन्वयः नच महत्वस्य विषयत्वं पर
माणवादावव्याप्तमिति व्याप्तस्वरूपादावितिवाच्यं लौकिकवात्तु

वाय्वानीतगंधाश्रयपार्थिवभागो रूपवा
न् पृथिवीत्वात् प्रत्यक्षसिद्धपृथिवीवत्

सर्वत्र २

१० शिवोम्

ष्यमन्यत्वविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ऽआत्मन्यः
तिव्याप्तिवारणाय चानुष्णेति गुरुत्वीद्वेरसवती गुरुत्ववत्त्वं रसवत्त्वं च पृथि
वीजलयोरित्यर्थः नच घ्राणेन्द्रियादीनां वाय्वानीतपार्थिवादिभागानां च
रसादिमत्त्वे किं मानमिति वाच्यम् तत्रापि पृथिवीत्वादिना तदनुमानात् द्वयो
र्नैमित्तिको द्रवः पृथिवीतेजसोरित्यर्थः न च नैमित्तिकद्रवत्वं घटादौ वह्न्या
दौ चाव्याप्तमिति वाच्यम् नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्य
जातिमत्त्वस्य विवक्षितत्वात् ऽआत्मनोऽन्तर्वार्त्यविशेषगुणयोगिनः पृ
थिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः यदुक्तं यस्यसा

घ्राणरसनेगुरुत्वरसवती पृथिवीज
लत्वाभ्यां व्रत्पद्यासिद्धेः पृथिवीजलव
त्

इति मदत्यंताभावाप्रतियोगित्वं के
वलान्वयित्वम् २

ननु सप्तानां साधर्म्यं ज्ञेयत्वं तत्कस्य वैधर्म्यमित्याशंकायामाह ज्ञेयत्वादिकमिति ।

१८
भा॰मु॰
18

धर्म्म्यं वैधर्म्यमितरस्य तत [२८] ज्ञेयत्वादिकं विहायेति वोध्यम् ननु कस्यापि
न वैधर्म्यं केवलान्वयित्वात् स्पर्शादयोष्टौ वेगाख्यः संस्कारो मरुतो गुणाः
स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः [३०] स्पर्शादयोष्टौ वेगश्च द्रवत्वं च
गुरुत्वकं रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश [३१] स्नेहहीना गंधयुक्ताः
क्षितावेते चतुर्दश बुद्ध्यादिषट्कं संख्यादिपंचकं भावना तथा [३२] धर्माध
र्मौ गुणा एते आत्मनः स्युश्चतुर्दश संख्यादिपंचकं कालदिशोः शब्द
श्च ते च खे [३३] संख्यादयः पंच बुद्धिरिच्छा यत्नोपि चेश्वरे परापरत्वे संख्या
दिपंच वेगश्च मानसे [३४] ते च संख्यादयः पंच खे आकाशे साधर्म्यं वैधर्म्यं

वायोर्नवैकादश तेजसो गुणा जलक्षिति
प्राणभृतां चतुर्दश दिक्कालयोः पंच षडेव
चांबरे महेश्वरेष्टौ मनसस्तथैव च ९

१८
शिवाय

ननु गंधवत्वस्य पृथिवीलक्षणत्वे पाषाणादौ गंधस्यानुपलब्धेरव्याप्तिरित्याशंकां
निराकरोति न चेत्यादिना ५

निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति तत्रेति गंधहेतुः गं

गंधहेतुत्वं कालादाव
तिव्याप्तमतो व्याचष्टे गं
धेति २

धहेतुरिति गंधसमवायिकारणमित्यर्थः यद्यपि गंधवत्वमात्रं लक्षण

मुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तं

गंधत्वावच्छिन्नंप्रति पृथि
व्याहेतुत्वानंगीकारे ४

तथाहि पृथिवीत्वं हि गंधसमवायिकारणतावच्छेदकतया सिद्ध्यति

समवायसंबंधावच्छिन्नगंधत्वावच्छिन्नकार्यता
निरूपिततादात्म्यसंबंधावच्छिन्नाकारण
तायाः किंचिद्धर्मावच्छिन्नाकारणतात्वात् घटनि
रूपितदंडनिष्ठकारणतावत् ४

नियतकारणनियम्यत्वापत्तेरित्यर्थः

अन्यथा गंधत्वावच्छिन्नस्याकस्मिकत्वापत्तेः न च पाषाणादौ गंधा

भावात् गंधवत्वमव्याप्तमिति वाच्यं तत्रापि गंधसत्वात् अनुपलब्धि

स्तु अनुद्भूतत्वेनाप्युपपद्यते अन्यथा तद्भस्मनि गंधः कथमुपल

भ्यते भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं सि

स्यात्ति यद्द्रव्यं यद्द्रव्यध्वंसजन्यत्वं तत्तदुपादानोपादेयमिति व्याप्तिः द
ष्टं चैतत्खंडपटे महापटध्वंसजन्ये द्रव्यं च पाषाणपरमाणोः पृथिवी॥
त्वात् तज्जन्यपाषाणस्यापि पृथिवीत्वं तथा च तस्यापि गंधवत्त्वे बाधका
भावः नानारूपवती मता शुक्लनीलादिभेदेन नानाजातीयं रूपं पृ
थिव्यामेव वर्तते ननु जलादौ तत्र शुक्लस्यैव सत्त्वात् पृथिव्यां त्वेकस्मि
न्नपि धर्मिणि पाकवशेन नानारूपवत्त्वसंभवात् न च यत्र नानारूपं
नोत्पन्नं तत्राव्याप्तिः रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं
रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं वा वाच्यं वैशेषिकनये पृथि

उपस्थितेपरित्यज्यानुपस्थित कल्पने मानाभावात्

वी परमाणौ रूपनाशास्य रूपान्तरस्यैव सत्त्वात् न्यायनये घटादावपित
त्सत्त्वात् लक्षणसमन्वयः षड्विधस्तु रसस्तत्र मधुरकटुकषायादिभे
देन यः षड्विधो रसः स पृथिव्यामेव जले तु मधुरो रसः अप्यापि पूर्ववं
त रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थो बोध्यः गंध
स्तु द्विविधो मतः द्विविध इति वस्तुस्थितिमात्रं न तु द्विविधत्वमपि
लक्षणं द्विविधत्वस्य व्यर्थत्वात् द्वैविध्यं च सौरभासौरभभेदेन बोध्यं
स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ॥ तस्याः पृथिव्याः
अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्त्तत इत्यत उक्तं पाकज इति इदं च वट

ननु पत्रनाम्ना रसानेकत्ववत्त्वाः तत्राव्याप्ति
स्यात् अत आह ह्वेति १

ननु मूले गंधस्तु द्विविधो मत इत्यनेन द्वि
विधगंधवत्त्वं पृथिव्या लक्षणं प्रदर्शितं
तद्वा... द्वैविध्याख्यानस्यैव पर्यालोचित्वा
ह वस्तुस्थितीति ४

पाकजस्पर्शवत्त्वमात्रोक्तौ वेत्यर्थः १

सन्नामादाय गगनादावतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति द्रव्यत्वसमानाधिकरणसत्तया तद्वारणाय व्याप्यभागः स्पर्शसमानाधिकरणजलत्वादिना जलादौ तद्वारणाय पाकजेति पाकजद्रव्यत्वसमानाधिकरणपृथिवीत्वेन तेजसि तद्वारणाय स्पर्शेति जलपृथिव्यन्यतरत्वादिना जलादौ तद्वारणाय जातीति

न्या॰ मु॰ २०

२०

पृथिव्यां शीतोष्णस्पर्शाशीतद्ग्निरासनार्थं तदुक्तं पाकजस्पर्शवत्त्वमात्रं लक्षणे

अधिकस्यैव पर्यन्तात् यद्यपि पाकजस्पर्शः पटादौ नास्ति तथा

पि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः नित्या प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वम् ३

नित्या च सा द्विधा नित्या स्यादणुलक्षणा अनित्या तु तदन्या स्यात्सैवा

अणुत्वस्य द्व्यणुकेपि सत्त्वात् तत्र रूपान्तरायाह रूपेति २ वयवयोगिनी सा पृथिवी द्विविधा नित्यानित्या चेत्यर्थः अणुल

क्षणा परमाणुरूपा पृथिवी नित्या तदन्या परमाणुभिन्ना पृथिवी द्व्यणुका

दिलक्षणा सर्वाप्यनित्येत्यर्थः सैवानित्या पृथिवी चावयववतीत्यर्थः अवयवयोगिनीत्यस्य २४

बौद्धः शंकते नन्ववयविनि किं मानं परमाणुपुंजैरेवोपपत्तेः न च परमाणुर्नाम विलक्षणसंस्थानविशिष्टैः परमाणुभिरेवायं घट इति प्रतीतेरुपपत्तेरित्यर्थः १

न च घट इति प्रतीतिरवयविनि मानमत आह॥

राम

२०

परमाणूनामेकत्वदर्शनात्वाद्धं १

धान्यधान्यसमूहस्यैकत्वादेकत्वमिति प्रतीति
रेवं संख्याविशेषेपि स्वमहत्वरूपतया
महानिति च प्रतीतिः स्यात् परमाणुपुं
जेष्विति भावः ४

त्वा १५

नींद्रियत्वात् घटादेः प्रत्यक्षत्वं न स्यात् इति वाच्यं एकस्य परमाणोरप्रत्यक्ष
त्वेपि तत्समूहस्य प्रत्यक्षत्वात् यथैकस्य केशस्य दूरे प्रत्यक्षत्वेपि तत्समूह
स्य प्रत्यक्षत्वं नचैवं स्थूलो घट इति बुद्धेरनुपपत्तिरिति वाच्यं एको महान् धा
न्यराशिरितिवदुपपत्तेरेवं परमाणोरतींद्रियत्वेन तत्समूहस्य प्रत्यक्षत्वायो पि ४५
गात् दूरस्य केशस्तु नातींद्रियः सन्निहितस्य तस्यैव प्रत्यक्षत्वात् नच तदा १ घटप्रत्यक्षकाले ५
नीदृश्यपरमाणुपुंजस्योत्पन्नत्वान्न प्रत्यक्षत्वे विरोध इति वाच्यं अदृश्यस्य दृ
श्यानुपादानत्वे अन्यथा चक्षुर्द्व्यादिसंततेः कदाचित् दृश्यत्वप्रसंगः स्यात् १
नचाति तप्ततैलादौ कथमदृश्यदहनसंतते दृश्यदहनोत्पत्तिरिति वाच्यं त
त्र तदंतःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरभ्युपगमात् नचादृश्यन

द्व्यणुकेन कथं ह्रस्वत्रसरेणोर्महत्त्वमिति निवाच्यं यतो नवयं ह्रस्वत्वमह्रस्वत्वे
वा कस्यचित्स्वभावादाचक्ष्महे किंतु महत्त्वोद्भूतरूपादिकारणसमुदायवत्त्वा
ह्रस्वत्वं तदभावे चाह्रस्वत्वं तथा च त्रसरेणोर्महत्त्वात् अल्पत्वं न तु द्व्यणुका
देस्तदभावात् न हि त्वन्मतेपीदं संभवति परमाणोर्महत्त्वाभावात् । इत्थं ।
वा [illegible] वयविसिद्धौ नैयानुमादविनाशयोः अन्यदतसिद्धत्वादनित्य
त्वं नैयायिकावयव [illegible] धारायामनंतत्वे महत्सर्षपपर्वतयोरपि साम्यप्रसंगः
अतः क्वचिद्विश्रामो वाच्यः यत्र विश्रामस्तस्यानित्यत्वे समवेतकार्या ।
त्पत्तिप्रसंगः स्यादतस्तस्य नित्यत्वं परममहत्परिमाणतारतम्यस्यागग

अनंतावयवारब्धत्वेनाविशेषात् परिमाणवत्त्वेनेति दोषः ३

अनवस्थायास्तारतम्यं क्वचिद्विश्रांतं परिमाणतार
तम्यत्वात् परममहत्परिमाणवत्

नाद्येविश्रांतत्वमिवाणुतारतम्यस्यापिक्वचिद्विश्रांतत्वमस्ति इतित
स्यपरमाणुत्वसिद्धिः नचत्र्यसरेणावेवविश्रामोस्त्विति वाच्यं त्र्यसरे
णुःसावयवःचाक्षुषद्रव्यत्वाद्घटवत् इत्यनुमानेनतदवयवसिद्धेः
त्र्यसरेणोरवयवाःसावयवामहदारंभकत्वात्कपालवदित्यनु
मानेनतदवयवसिद्धेः नचेदमप्रयोजकंअपकृष्टमहत्त्वंप्रत्यनेकद्र।
व्यत्वस्यप्रयोजकत्वात् नचैवंक्रमेणतदवयवधारापिसिद्ध्येदिति।
वाच्यं अनवस्थाभयेनतदसिद्धेः साचत्रिधाभवेद्देहमिंद्रियंविष
यस्तथा साकार्यरूपापृथिवीत्रिविधाशरीरेंद्रियविषयभेदादित्य

२२
न्या॰मु॰
22

र्थः तत्र देहमुदाहरति योनिजादिभेदेनेहम् योनिजमयोनिजं चेत्य
र्थः योनिजमपि द्विविधं जरायुजमण्डजं चेति जरायुजं मनुष्या दी
नाम् अण्डजं सर्पादीनां अयोनिजं स्वेदजोद्भिज्जादीनां स्वेदजाः कृ
मिदंशाद्याः उद्भिज्जास्तरुगुल्माद्याः नारकिणां शरीरमप्ययो
निजं न च मनुष्यादि शरीरे पार्थिवत्वे किं मानमिति वाच्यं गं
धादिमत्त्वस्यैव प्रमाणत्वात् न च क्लेदो ष्मादेरुपलम्भादाप्यत्वा
दिकमपि स्यादिति वाच्यं तथा सति जलत्वपृथिवीत्वादिना सां
कर्यप्रसंगात् न च तर्हि जलीयत्वादिकमेवास्तु न पार्थिवत्वादिकमि

२२
शिवोम्

नरेदेवेदं शरीरमितिरीत्या प्रत्ते।

तिवाच्यं लेो दादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात् गंधा
द्युपलंभेऽप्यर्थे पृथिवीत्वसिद्धेः तेन पार्थिवादिशरीरे जलादीनां नि
मित्तमात्रं बोध्यं शरीरत्वं तु न जातिः पृथिवीत्वादिना सांकर्यात्
किंतु चेष्टाश्रयत्वं हस्तादीनामपि चेष्टाश्रयत्वान्नाव्याप्तिः न च वृ
द्धादेः शरीरत्वे किं मानमिति वाच्यं आध्यात्मिकवायुसंबंधस्य
प्रमाणत्वात् नन्वेवं किं मानमिति चेत् भग्नक्षतसंरोहणादिना
तदुन्नयनात् यदि हस्तादौ शरीरव्यवहारो न भवति तदान्त्यावय
वित्व ... न तद्विशेषणीयं न च पक्षशरीरे चेष्टा न जाता तत्राव्याप्तिः

वृक्षादयः शरीरं प्राणादिमत्त्वा
त् मानुषादिशरीरवत् ३

वृक्षादयः प्राणादिमन्तः भग्न
क्षतसंरोहणादिमत्त्वात् २

शरीरत्वात्तंनाभावसमानाधि
करणं पृथिवीत्वविशेषरूपा
पं पृथिवीत्वं पृथिवीत्वात्यन्ता
भावसमानाधिकरणं शरी
रत्वं जलीयशरीरे तयोरुभयोः
समावेशः पार्थिवशरीरे १

२१ न्या॰मु॰ रितिवाच्यं तादृशोपस्थाणाभावात् अथवा चैत्रावदंत्यावयविवृ
त्तिद्रव्यत्वव्याप्यजातिमत्त्वमंत्यावयविमात्रवृत्तिचैत्रावयवृत्तिजाति
23 नृतनत्वच ३४ मत्त्वं वा तं मानुषत्व चैत्रत्वादिजातिमादाय लक्षणसमन्वयः नचन
सिंहशरीरे लक्षणासमन्वयः नरनसिंहस्यैकत्वेन जाति[illegible]त्वाभावा व्यक्तिवृत्ति[illegible]४
त् जन्यीयते जन्यशरीरवृत्तितया देवतस्यापि जाति[illegible]त्वाभावादिति ।
वाच्यं कल्पभेदेन नरसिंहशरीरस्यैकानात्वेन नरसिंहत्वजात्या लक्ष
णसमन्वयात् इंद्रियं घ्राणालक्षणं घ्राणेंद्रियं पार्थिवमित्यर्थः ।
पार्थिवत्वं कथमिति चेत् इत्थं घ्राणेंद्रियं पार्थिवं रूपादिमध्ये गंधस्ये ७[illegible]
वाभिव्यंजकत्वात् कुंकुमगंधाभिव्यंजकघृतादिवत् नच दृष्टांतेसौ २१ शिवाम्

घटरूपादिव्यंजकत्वाद्दृष्टिरिति वाच्यं परकीयघटरूपाद्यनभिव्यंजक-
त्वस्य तद्दर्पणत्वात् नच नवघटगंधव्यंजकजलेनानैकांतिकमिति
वाच्यं तस्यानवघटगंधव्यंजकजलस्य सक्तुरसाभिव्यंजकत्वा
त् यद्वा परकीयेति नेदं वाच्यं पनीनकुसुमभागस्य दृष्टांतत्वसं
भवात् नच घ्राणेंद्रियसन्निकर्षे स्यगंधमात्रव्यंजकत्वात्तत्र
व्यभिचार इति वाच्यं द्रव्यत्वे सतीति विशेषणात् वि[illegible]षयो द्व्यणु
कादित्यु ब्रह्मांडस्तउदाहृतः उपभोगसाधनं हि विषयः सर्वमेव
हि कार्यजातमदृष्टाधीनं यच्च कार्यं यददृष्टाधीनं तत्तदुपभोग
साधनमपरथा वाजनयत्वेव नहि बीजप्रयोजनाभ्यां विना कस्य

२८
न्या॰मु॰
२५

विदुत्वन्निरस्तं तेन द्व्यणुकादिकमतीन्द्रियं सर्वमेव विषयो भवति शरीरेन्द्रि
यपोर्विषयत्वेपि प्रकारान्तरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः जलं नि
रूपयति वर्णः शुक्ल इति स्नेहसमवायिकारणतावच्छेदकतया जलत्वं।
जातिः सिद्ध्यति यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न [illegible] तथापि कार्य्यतावच्छेदकं ४
तथा।५४ जन्यस्नेहत्वं बोध्यं अथ परमाणौ जलत्वं न स्यात् तत्र जन्यस्नेहाभावात्
तस्य च नित्यस्य स्वरूपयोग्यत्वेपि फलावश्यंभावनियमात् इति चेन्न।
जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ तदवच्छि
न्नजनकतावच्छेदकतया जलत्वजातिसिद्धिरिति शुक्लरूपमेव जल
स्येति दर्शयितुमुक्तं वर्णः शुक्ल इति ननु शुक्लरूपवत्त्वं लक्षणं यदि वा

जन्यजलसमवायिकारणतानां किं
चिद्धर्मावच्छिन्नकारणतात्वाद्दण्ड
निष्ठकारणतावत्

२८
शिवोम्

नैमित्तिकद्रवत्ववद्वृत्ति रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजाति
मत्वं भास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रवत्वसाक्षाद्व्या
प्यजातिमत्वं वा तदर्थः तेन स्फटिकादौ नातिव्याप्तिः रसस्पर्शाववि
ति जलस्य मधुर एव रसः शीत एव स्पर्शः तिक्तवद्वृत्तिमधुरवद्वृ
वर्णः शुक्लः रसस्पर्शौ जले मधुरशीतलौ
त्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं शीते तरस्पर्शवद्वृत्तिशीत तेन शर्करादौ नातिव्याप्तिः ४
स्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं वा तदर्थः
ननु शुक्लरूपमेवेति कुतः कालिंदीजलादौ नी
लिमोपलब्धेरिति चेन्न नीलजनकतावच्छेदकायाः पृथिवीत्वजा

२५ न्या॰ मु॰ 25

तेरभावात् जलेनीलरूपासंभवात् कालिंदीजलेनीलत्वप्रतीतिस्त्वाश्रयौ
पाधिकीभ्रांतिरेव अतएववियति विक्षिप्ते धवलिमोपलब्धिः अथजले
माधुर्ये किंमानं नहि प्रत्यक्षेणकोपिरसस्तत्रानुभूयते नच नारिके
लजलादौमाधुर्यमुपलभ्यतएवेतिवाच्यं तस्याश्रयोपाधिकत्वात्
अन्यथा जंबीर जलादावम्लाद्युपलब्धेरम्लादिमत्वमपिस्यादिति
चेन्न हरीतक्यादिभक्षणस्यजलरसव्यंजकत्वात् नच हरीतक्यामेवज
लोष्मसंयोगाद्रसांतरोत्पत्तिरितिवाच्यं कल्पनागौरवात् पृथिवीत्व
स्याम्लादिजनकतावच्छेदकत्वाच्च जलेनाम्लादिकं जंबीरजलादौ
त्वाश्रयौपाधिकीतथाप्रतीतिः एवंजलत्वशीतस्पर्शजनकतावच्छे

२५ शिवाम

तु२

दकं जन्यजलत्वं तदवच्छिन्नजनकतावच्छेदकं च जलत्वं बोध्यं एवं
दनादौ शैत्योपलब्धिश्चंदनांतर्वर्तिशिशिरसलिलस्य तेजःसंयोगा
ज्जले उष्णप्रतीतिरौपाधिकी स्फुटैव तत्र पाकासंभवात् स्नेहेति घृ
तादावपि तदंतर्वर्तिसलिलस्यैव स्नेहः जलस्य स्नेहसमवायिकारण

स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ३९

त्वात् तेन जलस्यैव स्नेहः प्रतिमंतव्यं द्रवत्वमिति सांसिद्धिकद्रवत्वत्वं
जातिविशेषः प्रत्यक्षसिद्धः तदवच्छिन्नजनकतावच्छेदकमपि त
देवेति भावः तैलादावपि तदंतर्वर्तिजलस्यैव द्रवत्वम् स्नेहप्रकर्षे
ण च दहनानुकूल्यमिति वदंति नित्यतादीति पृथिव्यादिवत्य जल १४

२३
न्या॰मु॰

मेवेत्यर्थः तत्र ५

२८

र्थः तथाहि जले द्विविधं नित्यमनित्यञ्च नित्यं परमाणुरूपं द्व्यणुका
दिकं सर्वमनित्यमवयवसमवेतं च अनित्यमपि त्रिविधं शरीरेन्द्रियवि
षयभेदात् पृथिवीतो विशेषस्तमाह किं त्विति [illegible]
जलीयं शरीरमयोनिजं वरुणलोके प्रसिद्धं इन्द्रियं रसनं जलीयमित्य॰

नित्यतादि पूर्ववत् किंतु देहमयोनिजं इंद्रियं रसनं सिंधुर्हिमा
दिर्विषयो मतः ३८

र्थः तथाहि रसनं जलीयं गंधाद्यव्यंजकत्वे सति रसव्यंजकत्वात् सक्तुर
साभिव्यंजकोदकवत् वायूपनीत शीतभागवद्वा रसनसन्निकर्षव्य
भिचारवारणाय द्रव्यत्वं देयं विषयं दर्शयति सिन्धुरिति सिन्धुःस
मुद्रः हिमं तुषारः आदिपदात् सरित्क र कादि सर्वो ग्राह्यः तथ

२३
शिवाम

कर्कपोःद्धि:

त्यद्वर

र१

हिमकरकयोः काठिन्यात् पार्थिवत्वमिति वाच्यं ऊष्मणा विलीनयोस्त-
योर्जलत्वस्य प्रसिद्धत्वात् यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादा-
नोपादेयत्वसिद्धेः अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकादौ काठिन्य-
स्य भ्रान्तत्वात् तेजो निरूपयति ॥ स्पर्शेति उष्णत्वं स्पर्शनिष्ठो जा-
स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरं श्रीराम

उष्णत्वजाति सिद्धौ १

तिविशेषः प्रत्यक्षसिद्धः ध्वंसे च जन्योष्णस्पर्शजनकतावच्छेदकं तेन
त्वं जातिविशेषः तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसंधेयं न चोष्ण-
स्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यम् तत्राप्युष्णस्पर्शस्य स-
त्त्वात् किन्तु तदंशतः पातिनस्तत्स्पर्शो नाभिभवान्न तद्ग्रहः एवं रत्नकिरण

जन्यतेजस्त्वावच्छिन्नजनकतावच्छेदकतया तेजःपरमाणौ तेजस्त्वजातिः ३

२२
न्या॰ मु॰

दौ पार्थिवस्पर्शेनाभिभवाच्चानुद्भूतत्वान्न दग्रहः स्यादूपमिति वैश्वा
नरेमस्वात विरण्येद्दौ पार्थिवरूपेणाभिभवात्कुतो नोपग्रहः तद्रूपाग्रहे ध
र्म्मिणोपि चाक्षुषत्वं न स्यादिति चेन्न अन्यदीयरूपेणैव धर्म्मिणोपि ग्रह
संभवात् शंखस्यैव पित्तपीतिम्नावच्छिन्नस्य शुक्लरूपेणाभिभूतं किं तु तदीयं शु

नैमित्तिकद्रवत्वं तु नित्यतादिवृष्टिवत्

त्वम नाभिघृतमित्यन्वयः नैमित्तिकेति सुवर्णादिरूपे तेजसि तत्तत्वात् नव
नैमित्तिकद्रव त्वं दहनादावव्याप्तं घृतादावतिव्याप्तं चेति
वाच्यं हयिमग्रत्ति नैमित्तिकद्रवत्वत्वव्यहृति द्रव्यत्वसाक्षा द्व्याप्यजाति २२ शिवो
मत्वस्य विवक्षितत्वात् नित्यतादीति नन्वस्य चेत्यर्थः नद्यादि नंद्विविधं नि

त्यमनित्यं च नित्यं परमाणुरूपं तदन्यदनित्यमवयवसमवेतं च तच्च
शरीरेन्द्रियविषयभेदेन त्रिधा शरीरमयोनिजमेव तच्चादित्यलोके प्र। त्यपः
सिद्धं अत्रयो विशेषणमाह इन्द्रियमिति ननु चक्षुषस्तैजसत्वे किं मान
मिति चेदुच्यते चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यं
जकत्वात् प्रदीपवत् प्रदीपस्य स्वीयस्पर्शाद्यव्यञ्जकत्वादाद्यं परकीयेति घटा

इन्द्रियं नयनं वह्निः स्वर्णाद्यं विषयो मतः

देस्स्वीयरूपव्यञ्जकत्वाद्व्यभिचारवारणाय द्वितीयं परकीयेति अथवा प्र
भायादृष्टान्तत्वसंभवादाद्यं परकीयेति निर्देयं चक्षुःसन्निकर्षव्यभिचारवा
रणाय रूपव्यञ्जकत्वं देयं विषयं दर्शयति वह्नीति ननु सुवर्णस्य तैजसत्वे किं।
मानमिति चेन्न सुवर्णं तैजसं असति प्रतिबन्धके अत्यन्तानलसंयोगे

२८
मा॰ मु॰

28

अनुच्छिद्यमानद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवं यथा पृथिवी नन्वाप्र ती
योजकं पृथिवीद्रवत्वस्य जलद्रवत्वस्य वाग्निसंयोगनाश्यत्वात् ननु पी
तिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रुतत्वान्नैतव्यभिचार इति चेन्न
तोऽदस्भूर्तात् ५ जलमध्यस्थमसीतोऽद्रवत्वस्यादर्शनात् अपरे तु पीतिमाश्रयस्यात्यन्ता
ग्निसंयोगेपि पूर्वरूपापरावृत्तिदर्शनात् तत्प्रतिबंधकं विजातीयद्रव
द्रव्यं कल्प्यते तथाह्यग्निसंयोगी पीतिमगुरुत्वाश्रयः विजातीयरू
पप्रतिबंधकद्रवद्रव्यसंपृक्तः अत्यन्ताग्निसंयोगे[illegible]पि पूर्वरूपविजा
तीयरूपानधिकरणत्वात् तप्तजलमध्यस्थपीतपटवत् तस्य च पृथि
वीजलाभिन्नस्य तेजस्त्वनियमात् वायुं निरूपयति ॥ पाकजेति ॥ अनु

२८
शिवाय

ष्णाशीतस्पर्शः स च पृथिव्यामपि सत्वादुक्तमपाकज इति ॥ अपाकजस्प
र्शस्य जलादावपि सत्वादुक्तमनुष्णाशीत इति एतेन विजातीयस्पर्शो
वायोर्दर्शितः तज्जन्यतावच्छेदकं वायुत्वमिति भावः एवं वायुस्स्प
र्शादिलिंगकः वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते विजातीयस्प

र्शपाकजोऽनुष्णाशीतस्पर्शस्तु पवनेमतः तिर्यग्गमनवानेष
ज्ञेयःस्पर्शादिलिंगकः स्पर्शेन विजातीयशब्देन तृणादीनां धृत्या
शाखादीनां कंपेन वायोरनुमानात् यथात् वायुर्न प्रत्यक्षस्तथाग्रेव
क्ष्यते पूर्ववदिति वायुर्द्विविधो नित्योऽनित्यश्च परमाणुरूपो नित्य
स्तदन्योऽनित्यः अवयवसमवेतश्चापि त्रिविधः शरीरेन्द्रियविषयभे

२९

न्या॰मु॰ दात् । तत्र शरीरमयोनिजं पिशाचादीनां परं तु जलीयतैजसवायवीय

२१ शरीराणां पार्थिवभागोपष्टम्भादुपभोगक्षमत्वं जलादीनां प्राधान्या

तैजस जलीयत्वादिकमिति । अत्र यो विशेषस्तमाह देहव्यापीति शरीरव्या

पकं स्पर्शग्राहकमिन्द्रियं त्वक् तच्च वायवीयं रूपादिषु मध्ये स्प

देहव्यापि त्वगिन्द्रियं

लिं प्राणादिस्तु महावायुपर्यन्तो विषयो मतः

र्शस्यैवाभिव्यञ्जकत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत् विष मि॰४

यं निरूपयति प्राणादिरिति ॥ यद्यप्यनित्यो वायुश्चतुर्विधस्तस्य चतुर्थी

विधा प्राणादिरित्युक्तमाकरे तथाप्यत्र संक्षेपाद्द्वैविध्यमुक्तं प्राणस्ते

दि॰ना॰ना॰१ करणवहद्देहस्थानवशान्मुखनिर्गमनादिनानाक्रियाभेदाच्च नानासंज्ञां लभ

२९
शिवोम्

न इति आकाशं निरूपयति आकाशस्येति आकाशकालदिशामेकैकव्य
क्तित्वादाकाशत्वादिकं न जातिः किंतु शब्दाश्रयत्वं वैशेषिकः गुणतिक थनं तु
विशेषगुणान्तराव्यवच्छेदाय तेन प्रमाणमपि दर्शितं तथा हि शब्दो गु
णः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्वात्स्पर्शवत् शब्दो
द्रव्यसमवेतो गुणत्वात्संयोगवत् इत्यनुमानेन शब्दस्य द्रव्यसमवेत
आकाशस्य तु विज्ञेय शब्दो वैशेषिको गुणः

दृष्टरूपस्य गुणत्वप्रसाधने
न मीमांसकमतं निरस्य
दानीं परिशेषात्तदाश्रय
तया आकाशं प्रसाधयति परि
शेषश्च प्रसक्तप्रतिषेधे अन्यत्राप्र
संगात् शिष्यमाणे संप्रत्ययः ॥
२४

तत्सिद्धिं शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणता
भावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात्सुखवत् पाकजरूपादौ व्य
भिचारवारणाय सत्यन्तं पटरूपादौ व्यभिचारवारणाय कारणपूर्व
केति जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति न दिक्का शब्दो २४
लमनसां गुणः विशेषगुणत्वात् नात्मविशेषगुणः बहिरिन्द्रियग्राह्यत्वाद्

१॰
न्या॰मु॰
30

पवत् स्पर्शवत्वाधिकरणसंभागतत्वमकं न नवमं द्रव्यं सिद्धमिति न च वा
युरेव पवेषु मतम् शब्दः क्रमेण वायोः कार्यगुण एवैकः शब्द
उत्पत्यनामिति वाच्यं यथा बाह्येन्द्रियप्रत्यक्षत्वाभावित्वेन वायुविशेषगु
णाभावात् न त्वदीशादीनां विशेषगुणत्वाभावादिति द्रिपंदर्शयति १

शब्दो न वायुगुणः प्रत्यक्षत्वाभावित्वात्
स्पर्शादिवदिति फलितम् २

इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः जन्यानां जनकः कालो जगतामाश्र
यो मतः

द्रियमिति ननु आकाशं लाघवादेकं सिद्धं श्रोत्रं तु पुरुषभेदाद्भि
न्नं कथमाकाशं स्यादत आह एकः सन्नपीति आकाशं एकः
सन्नप्युपाधेः कर्णशष्कुलीभेदाद्भिन्नं श्रोत्रात्मकं भव
तीत्यर्थः कालं निरूपयति जन्यानां जनक इति ननु प्रमाणं

३॰
शिवं

साक्षा १

सूर्यपरिस्पन्दादिविशिष्ट इदानीं घट इति प्रतीतिः परम्परासंबंधघटकसापेक्षा साक्षात्संबंधाभावे सति विशिष्टप्रतीतित्वात् लोहितः स्फटिक इति प्रतीतिवत् १

पि १ तस्मादि १

दर्शयितुमाह जन्यानामाश्रय इति इदानीं घट इत्यादिप्रतीतिः सूर्यपरि
स्पन्दादिकं यदा विषयीकरोति तदा सूर्यपरिस्पन्दादिना घटादेः संबं
धो वाच्यः स च संयोगादिर्न संभवतीति काल एव संबंधघटकः
कल्प्यते इत्थं च तस्याश्रयत्वं सम्यक्कथमाणं तद्दर्शयति

स्वसमवायिसंयुक्तसंयोगः ३

अनित्यित्तकालसिद्धेः

परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः

परापरत्वेति परत्वापरत्वबुद्धेरसाधारणं निमित्तं काल एव परत्वाप
रत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादेक इति नित्यं काल ए
व कल्प्यत इति भावः नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासव
र्षादिसमयभेदो न स्यादत आह क्षणादिरिति कालस्त्वेकोऽप्युपा

परत्वापरत्वे सासमवायिकारणे भावकार्यत्वात् असमवायिकारणं च तयोः कालपिंडसंयोग एवेति ४

३१
न्या॰मु॰
3)

धिभेदात्तत्र क्षणादिव्यवहारविषयः उपाधिस्तु स्वजन्यविभागप्राग
भावावच्छिन्नं कर्म पूर्वसंयोगावच्छिन्नविभागो वा पूर्वसंयोगना
शावच्छिन्नोत्तरसंयोगप्रागभावो वा उत्तरसंयोगावच्छिन्नं कर्म वा
न चोत्तरसंयोगानंतरं तत्र क्षणादिव्यवहारो न स्यादिति वाच्यं कर्म्मो

दूरांतिकादिधीहेतुरेका नित्या दिगुच्यते

त्तरस्तनादिति महाप्रलये तु क्षणादिव्यवहारो यद्यस्ति तदा ध्वंसनापत्या
ध्वंसेनैवोपपादनीय इति दिनादिव्यवहारस्तु तत्तत्क्षणकूटैः दिशं दि ति २
निरूपयति दूरांतिकेति दूरत्वमंतिकत्वं च दैशिकं परत्वमपर
त्वं च बोध्यं तद्बुद्धेरसाधारणं कारणं दिगेव दैशिकपरत्वापरत्व ३१
शिवो

योः समवायिकारणत्वं येनाश्रयत इति दिक्सिद्धिरिति भावः ननु ए-
कैव दिग्यदि तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यतामत
आह उपाधीति यत्पुरुषस्योदयगिरिसन्निहिता या दिक् तत्पु-
रुषस्य प्राची एवमुदयगिरिव्यवहिता या प्रतीची एवं तत्पुरु- पादिक॰ ४

उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक्

आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् हि॰ २

हि॰ ४ षस्य सुमेरुसन्निहिता या दिक् सा उदीची तद्व्यवहिता त्ववाची सर्वे-
षामेव वर्षाणां मेरुरुत्तरतः स्थित इति नियमात् आत्मानं नि-
रूपयति आत्मेति आत्मत्वजातिस्तु सुखदुःखादिसमवायि-
कारणतावच्छेदकतया सिद्ध्यति ईश्वरेऽपि सा जातिरस्त्येव

सुखदुःखादीतिआदिना ज्ञानेच्छाद्वे-
षप्रयत्नधर्माधर्मभावनापरिग्रहः यद्यप्यात्मत्व-
स्याप्यात्मनाप्रत्यक्षत्वे पि स्वात्मनि तत्त्वरूपेतोऽपि
नेह प्रत्यक्षविषयत्वमस्त्येव तथापि सकलात्म-
साधारणानुगतप्रत्यक्षासंभवेन जातिरूपेतत्र
सिद्ध्यत्यनेकसमवेतत्वघटितजातित्वग्रहे अनेकव्यक्तिग्रहहेतुत्वसंसर्गासिद्धत्वादित्यनुमानमेव तत्र प्रमाणमित्यभिप्रायेण
सुखादिकारणतावच्छेदकतया तत्सिद्धिः २

ननु तथाप्यात्मत्वजातेर्भगवदात्मसाधारणत्वे
मानाभावः स्यादत आह ईश्वरेऽपीति आत्मत्वाव्य-
वहारत्वादिश्रुतावात्मपदप्रयोगवहत्वादिति भा-
वः १

ननु तर्हि आत्मनि सुखाद्युत्पत्तिः कुतो न भवतीत्यत आह
अदृष्टादीति आदिना शरीरपरिग्रहः १

ननु तथापि नित्यसुखस्वरूपयोगफलत्वे फलाभावरूपं
भावः इति नियमेन स्यात्स्यसुखस्वरूपयोगफलत्वे फलो
पधानापत्तिरित्यत आह नित्यस्येति १

३२
न्या॰मु॰
32

अहमिति प्रतीतिः शरीरादिव्यतिरिक्तविषय
त्वे विप्रतिपन्नं प्रतीत्यर्थः ५

अदृष्टादिरूपकारणाभावाच्च न सुखदुःखाद्युत्पत्तिः नित्यसुखरूपयो
गफलत्वे फलाभावरूपभावः स्यस्याप्रयोजकत्वात् अपरे त्वीश्वरे [illegible] साजाति
नोऽस्त्येव प्रमाणाभावात् नच दशामन्तरव्यनवापत्तिः ज्ञानत्वेन विभ
जनादित्याद्युः इंद्रियादीति इंद्रियाणां शरीरस्यच परंपरया चैतन्य
संपादकत्वमित्यर्थः पञ्चम्या त्मन्यहं सुखीत्यादिप्रत्ययविषयत्वम
स्त्येव तथापि विप्रतिपन्नं प्रति प्रथमतत्त्वशरीरादिभिन्नत्वम
नीतिगोचर इति प्रतिपादयितुं न शक्यते अतः प्रमाणांतरं दर्श
यति करणमिति कुठारादीनां छिदिकरणानां कर्त्तारमंतरेण फ
लोपधानं न दृष्टम् एवं चक्षुरादीनां ज्ञानकरणानामपि फलोप
धानं कर्त्तारमंतरेणानोपपद्यत इत्यतिरिक्तः कर्त्ता कल्प्यते ननु श

जन्यपरमात्मात्वेऽदृष्टानुत्पत्यापत्तौ दृष्टानियमे मना
नाभावः २

स निषु जनकता निरूपित जन्यतावच्छेदकत्व
संबंधेन ४

चेतनाधिष्ठितेत्यनुमानमिति शेषः ४

वस्त्रादीनि सकर्तृकानि कार्यत्वात् कुठा
रादिवत् २

३२
शिवाय

अनुभवाश्रयस्य बालशरीरस्य नष्टत्वादिदानीमभा
वादिति भावः ४

रीरस्यैव कर्तृत्वमस्त्वत आह शरीरस्येति ननु चैतन्यं ज्ञानादिकमेव मुक्ता
नां तन्मते ध्वंसं न शरीराणामपि तदभावे कादाचित्कः प्राणाभावेन ज्ञानाभा
वस्य सिद्धिरिति चेन्न शरीरस्य चैतन्ये बाल्ये अवलोकितस्य स्थविरेस्म
रणानुपपत्तेः शरीराणामवयवोपचयापचयैरुत्पादविनाशशा
लित्वात् न च पूर्वशरीरोत्पन्नसंस्कारैर्द्वितीयशरीरे संस्कार उत्पद्य

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः

न इति वाच्यं अनन्तसंस्कारकल्पनायां गौरवप्रसंगात् एवं च शरी
रस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यादिष्टसाधनता
ज्ञानस्य तद्धेतुत्वात् तदानीमिष्टसाधनतानुभावकाभावात् जन्म
नेनु जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः न च

ननु बाल्यशरीरेण दृष्टस्य चेत्यत आह शरीर
णामिति ४

गौरवस्य फलमुखत्वादुपसंहारमाह एवं
चेति ४

स्तनपानप्रवृत्त्यव्यवहितपूर्वकाले १

१ स्वसाधनादन्यदपीत्यर्थः १

अयं वात: उद्बोधकसमवहितत्वस्तन्यपानेष्ट
साधनत्वविरोधकसंस्कारवान्जी
वित्वाद्व्यतिरेकेऽपीतस्तन्यपानवा
लकवत् २

स्तन्यपानप्रवृत्यनुकूलेष्टसाधनतास्मरणेति १

२२ जन्मांतरानुभूतमन्यदपि स्मर्येतेति वाच्यं उद्बोधकाभावात् अंतत्व । संस्कारनाशाद्वा १

न्या॰ मु॰ नापत्याजीवनादृष्टमेवोद्बोधकं कल्प्यते । स्वप्नं च संस्कारस्यानादित्वया

33 ॰आत्मनोऽनादित्वसिद्धावनादिभावस्य नाशासंभवान्नित्यत्वं संभवती

ति बोध्यं ननु चक्षुरादीनामेव ज्ञानादौ करणत्वं कर्तृत्वं चास्तु विरोधेऽसा विभिन्नाधिकरणवृत्तित्वे ४

न यात्वमिंद्रियाणां चेदुपघाते कथं स्मृतिः

धकाभावादत आह नयात्वमिति ॥ नयात्वं चैतन्यं उपघाते नाशे सति

॰अर्थाच्चक्षुरादीनामेव कथमिति दृष्टं चक्षुषा साक्षात्कृतानां चक्षुषो नन्विंद्रियांतरेणैव स्मृतिर्भविष्यतीत्यत आह अन्येनानुभू तेति ३

भावे स्मरणं न स्यादनुभवितुरभावात् अन्येनानुभूतस्यान्येन स्मर

णासंभवादनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभा इंद्रियाणां चैतन्यपक्षे यो दोषः सोऽत्र कल्पनायामपीति स्वचयितुमि त्याह ॥ ति १ २२

वादिति भावः ननु चक्षुरादीनां चैतन्यमास्तु मनसस्तु नित्यस्य चैतन्यं

शिवोऽहम्

यद्यपि व्यधिकरणयोः कार्यभावविरहात् सामानाधि
करणेनैत्युक्ति विफला तथापि यत्र विषयतासंबंधे
नस्मृतिस्तत्र विषयतासंबंधेनानुभवः इतीदृशावि
षयत्वघटितसामानाधिकरण्यप्रत्यासत्याका
र्यकारणभावस्यावश्यकः आत्मनिष्ठसामाना
धिकरण्यघटितकार्यकारणभावेन घटाद्यनु
भवेन जरं घटादौ विषयतासंबंधेन स्मृत्यापत्ते
रवारणादिति यदुः कर्तृकानुभवस्य घटेस्मृत्वादिंद्रियांतरकर्तृकं स्मरणं तत्र नानुपपन्नमित्याशंका निराकरणायत्याति: २

आत्मनिरूपणस्य प्रस्तुतत्वादात्मेत्युक्तं केवलमात्रस्यैव तत्
त्वमतं विज्ञानरूपत्वादिति बोध्यम् ४

स्यात्तत्राह मनोपीति ननु व्याख्यानेन चेतनमित्यर्थः ज्ञानादीति॥ मनसश्चे
तनत्वे ज्ञानादि प्रत्यक्षं न स्यात् मनसोऽणुत्वात्तदेव महत्त्वस्य हेतुत्वात्
मनसि ज्ञानसुखादिसत्त्वेऽपि न प्रत्यक्षानुपपत्तेरित्यर्थः यथा च मनसोऽणु
त्वं तथा देहे व्यापित्वं ननु स्यात् विज्ञानमेवात्मास्तु तस्य ततः प्रकाशरूपत्वाच्चेतन
त्वं ज्ञानसुखादि केवलं तस्यैवाकारविशेषः तस्याभावत्वादेव क्षणिकत्वेऽपि
मनोपि न तथा ज्ञानाना यतः प्रत्यक्षं तदा भवेत् ३
वेत्पूर्वविज्ञानस्योत्तरोत्तरविज्ञानहेतुत्वात्सुषुप्तावप्यालयविज्ञानधारा
निराबाधैवमनुगमद्वासनावासितत्वे सति पूर्वपूर्वविज्ञानजनितसं
स्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चे
न्न तस्य जगद्विषयकत्वे सर्वज्ञत्वापत्तिः यत्किंचिद्विषयकत्वे विनि

द्विविधं विज्ञानं प्रवृत्तिविज्ञानमालयविज्ञानं चेति तत्रा
यं घट इति प्रवृत्तिविज्ञानमहं ज्ञानमित्यालयविज्ञा
नं तदेव [illegible]त्मा तस्य विज्ञानस्य ४ विज्ञानवादिमते ४

ननु विज्ञानस्य क्षणिकत्वे तदाश्रितसंस्कारस्यापि क्ष
णिकत्वात्कालान्तरे स्मरणं न स्यादित्याशङ्क्य परि
हरति स्मरणादेरिति ३

ननु विज्ञानस्य जगद्विषयत्वं यत्किंचिद्विषयत्वं
वाभिमतमिति विकल्पाद्यं दूषयत्याह तस्येति १

पि यत्सत्तत्क्षणिकम् ५ अर्थक्रियाकारित्वं सत्त्वं
सर्वे भावाः क्षणिकाः सत्त्वात् विद्युदुन्मेषवत्

ननु सुषुप्तावात्मा न सिद्ध्येत् पूर्वोत्तरविज्ञानस्य क्षणि
कत्वेन नाशात् विज्ञानानां तस्य च तदानीमुत्पादका
भावादाह पूर्वपूर्वेति १५

आत्मतत्त्वरूपविज्ञानस्य सविषयत्वे दृष्टान्तं
तस्मात्सुषुप्ताविति १

निर्विषयापि त्वसंततिर्विज्ञानसंततिः १

प्रमाणाभावेपि तत्र ज्ञानत्व
शंकते तदानीमिति १ स्वीकारे २

२७ न्या॰मु॰ गमकाभावः सुषुप्तावपि विषयावभासप्रसंगश्च तदानीं निराकारा वि
ज्ञानसंततिरनुवर्तत इति चेन्न तस्याः प्रकाशने प्रमाणाभावात्। अन्यथा। प्रकाशत्वे ज्ञानत्वे ज्ञानत्वस्य विषयिताव्याप्यत्वादिति भावः २
३५ घटादीनामपि विज्ञानत्वापत्तिः न चेष्टापत्तिर्विज्ञानव्यतिरिक्तस्य वस्तु
नोऽभावादिति वाच्यं घटादेरनुभूयमानस्यापलपितुमशक्यत्वात्। आ
कारविशेष एवायं विज्ञानस्येति चेत्किमयमाकारविशेषो व्यतिरिच्य
ते विज्ञानान्न हि समाधाने विज्ञानव्यतिरिक्तेन नातिरिच्यते तर्हि समूहा नीलपीतसमूहालंबन इत्यर्थः ५
अत्र नीलव्यावृत्तिरूप इत्यर्थः ३ लंबने नीलाकारेपि पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात्। एकत्वात् ४
विरुद्धनीलत्वादीनामेकत्र समावेशे सति विरोधावधारणस्य दुरुपपादत्वात् २ अथापोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न नीलत्वादीनां विरुद्धाना
मेकस्मिन्न समावेशात् इत्थं तथा विरोधावधारणस्यैव दुरुपपादत्वा
न्न वा वासनासंक्रमः संभवति मातृपुत्रयोरपि वासनासंक्रमप्रसंगात् २७ शिवोम्

मात्रानुभूतस्य गर्भस्थेन तनयेन
स्मरणप्रसंगात् २

ज्ञानानामेव संस्कारोत्पादकत्वे
तेषामानन्त्यात्संस्काराणामानन्त्यापत्ति
रित्यर्थः २

नचोपादानोपादेयभावो नियामकः इति वाच्यं वासनायाः संक्रमासंभवा
त् उक्तास्मिन्नुत्पन्ने एव संक्रमः इति चेन्न तदुत्पादकाभावात् विज्ञानमेवो वासनोत्पादक इत्यर्थः २
त्पादकं तेन तदा संस्काराणां तत्प्रसंगः क्षणिकविज्ञाने च अतिशयविशेषः क वादी शंकते ३
ल्प्यते इति चेन्न मानाभावात् कल्पनागौरवाच्च एतेन क्षणिकशरीरे चैव
चैतन्यमित्यपि परास्तं गौरवादतिशये मानाभावाच्च बीजादावपि सहका शक्तिविशेषे ५
रिसमवधानासमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाकल्पनात् अस्तु
तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा अयमविनाशी वा
रे यमात्मा सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतेश्चेति चेन्न तस्य सविषय
त्वासंभवस्य दर्शितत्वात् निर्विषयस्य ज्ञानत्वे मानाभावात् सविषय
कत्वस्याप्यननुभवात् ज्ञानाज्ञानभिन्नो नित्य आत्मेति सिद्धं सत्यं ज्ञानमि

३५ तिब्रह्मपरंजीवेषुनोपयुज्यते ज्ञानाज्ञानसुखित्वादिभिर्जीवानांभेदसि
न्या॰मु॰ द्धौमुक्तावपीश्वरभेदोन्यथाबंधमोक्षानुपपत्तेः यापीश्वराभेदबोधकावेद
35 भे॰२ सोपितदैक्येनतदीयत्वं प्रतिपादयन्स्तौति अभेदभावनयैवपतित
व्यमितिभावः अतएवसर्वे आत्मनिःसमर्पिताइतिश्रूयते मोक्षदशायाम क॰पृता ४
ज्ञाननिवृत्त्याऽभेदोजायतइत्यपिनभेदस्यनित्यत्वेननाशायोगात् भेदना
शेपिव्यक्तिद्वयंस्यात्स्यात्येवनचद्वित्वमपिनश्यतीतिवाच्यंतत्त्वनिर्धर्म
केब्रह्मणिसत्यत्वाभावेपिसत्यत्वरूपंतदितिवत् द्वित्वाभावेपिद्वित्यम मुक्ति ५
कौतादित्यस्यापिसुवचत्वात् मिथ्यात्वाभावोधिकरणात्मकस्तत्रसत्य
त्वमितिचेदैक्यत्वाभावोव्यक्तिद्वयात्मकोद्वित्वमित्यप्युच्यतां यत्त्वेकस्मेक
त्वेपिपृथिवीजलयोर्नगंधइतिवदुभयंनैकमित्यस्यसर्वजनसिद्धत्वात्।
योपितदानीमभेदप्रतिपादकआगमस्सोपिनिर्दुःखत्वादिनासाम्य ३५ शिवोम

गनिपाद यतिसंपद्यधिकेपुरोहितोयंराजा संहृत इतिवत् ऽअत एव निरं
जनः परमं साम्यमुपैतीति श्रूयते ईश्वरोपि न ज्ञानसुखात्मा किंतु ज्ञानाश्रया
श्रयः नित्यं विज्ञानमानंदं ब्रह्मेत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः
यः सर्वज्ञः इत्याद्यनुरोधात् आनंदमित्यस्याप्यानंदवदित्यर्थः ऽअर्शआदि
प्रत्यप:५ त्वान्मत्वर्थीयोऽच् ऽअन्यथा पुंल्लिंगत्वापत्तेः ऽआनंदोपि दुःखाभावेनो
पचर्यते भाराद्यपगमे सुखीसंवृत्तोहमितिवत् ऽअसुखात्तस्मिन्नानंदो ऐजात:६
न तस्मादानंदः ऽअसुखमितिश्रुतेः न विद्यते सुखं यस्येति कुतो नार्थ इ
ति चेन्न क्लिष्टकल्पनापत्तेः प्रकरणविरोधात् ऽआनंदमित्यत्र मत्वर्थी
चेप्र३ यस्य प्रत्ययविरोधाच्चेति संक्षेपः एतेन प्रकृतिः कर्त्री पुरुषः पुष्करप
लाशवन्निर्लेपः किंतु चेतनः कार्यकारणयोरभेदात्कार्यनाशे सति
कार्यरूपतया तन्नाशे नाशस्यादित्यकारणत्वं तस्य बुद्धिगत चैतन्याभिमान।

मिथ्या ५ इंद्रियद्वारा २

न्यथानुपपत्त्यानन्त्वाल्पनं बुद्धिश्च प्रकृतेः परिणामः सैव महत्तत्त्वमंतःक
रणमित्युच्यते न च सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ तस्मात् वैइंद्रियप्रणा व२
लिकया परिणतिर्ज्ञानरूपा घटादिना संबंधः पुरुषे कर्त्तृत्वाभिमानो बुद्धौ
चैतन्याभिमानश्च भेदाग्रहात् ममेदं कर्तव्यमिति मद्दृशः पुरुषोपरागो बुद्धेः इदानीं बुद्धितत्त्वोपलब्धौ भेदप्रदर्शनाय बुद्धेरंशत्रयं प्रदर्शयति ४
आत्मनः ५ स्वच्छतया नत्वप्रतिबिंबादतात्त्विको दर्पणस्येव मुखोपरागः इदमिति विष
योपरागः इंद्रियप्रणालिकया परिणतिभेदस्तात्त्विकः निःश्वासाभिह परिणामविशेषः ६
१२ः तदर्पणस्येव मालिन्य[illegible]कर्तव्यमिति व्यापारावेशस्तेनांशत्रयवती बु व्यापारांशः ... ः
द्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः संबंधः दर्पणमालिन्येनेव
सः संबंधः ३ मुखस्योपलब्धिरुच्यते ज्ञानवत्सुखदुःखेच्छाप्रयत्नधर्माधर्मा अपि बु हे ब ३
द्धेरेव कृतिसामानाधिकरण्येन प्रतीतिः न च बुद्धेश्चेतनापरिणामिता दिनि
मतमपास्तं कृत्यदृष्टमेयानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेः

३६
शिवाय

बुद्धिकर्तृत्वाभाववतीनन्यपर्माश्रयत्वादितिबाधकस्य
तत्रापिसत्त्वादितिभाव:२

कर्तृचेतनयोर्भेदांगी
कारे२

नहित्वे मानाभावाच्च चेतनोहं करोमीति प्रतीतिश्चैतन्यांशे भ्रम इति चेन्न तत्यं
शेपि विनिगम्यते अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावः नित्यत्वे तत्र सर्वं समस्तसारापा

मूल३ त्तिः अचेतनायाः प्रकृतेः कार्यत्वात् बुद्धेरचेतनत्वं कार्यकारणयोस्तादा अभेदादित्यर्थ:३

बुद्धेःप्रकृतिकार्यत्वाभा
वात्४
सिद्धेः
त्म्यादिति चेन्न असिद्धेः कर्तुर्जन्यत्वे मानाभावात् वीतरागजन्मादर्शना इतिन्यायसूत्रे वीतरागजन्मादर्शना
दितिभाव:४

बसनाप दनादित्वमनादेर्भोगासंभवान्नित्यत्वं किंतन्महत्त्वाद्यादिकल्पनेन नन्वप्र
कृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताह
मिति मन्यते इत्यनेन विरोध इति वाच्यं प्रकृतेर्दृष्टस्य गुणैर्दृष्टजन्यैरि नै५

पक्षपक्षबुद्धित्वात्रसपक्षप्रतिदृर्म
ति:३
च्छादिभिः कर्ताहमेवेत्यस्य तदर्थत्वात् नत्वेवं सति कर्तारमात्मानं केवलं
तु यः इत्यादि वदता भगवता प्रकटीकृतोयमुपरिष्टादाशय इति संक्षेपः

के धर्माधर्माविति आत्मेत्यनुषज्यते शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्म
प्रत्यक्ष:१ णां देहान्तरे भोगानुपपत्तेः अध्यक्ष इति योग्यविशेषणं गुणसंबंधेना स्पष्टतानहत्वादे:१

अधिष्ठानं तथा कर्ता करणं च पृथग्विधं विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंच
मं शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः न्याय्यं वा विपरीतं वा पंचैते तस्य हेतव:४
अष्टयं कर्म्मिदग:

घटमहं जानामि घटमहं करो
मीति प्रतीतेरित्यर्थः १

आत्मनो विशेषगुणाविनिर्मोके भाना
भावात् १

३७
न्या॰मु॰
37

त्मनः प्रत्यक्षं भवति न त्वन्यस्य । अहं जाने ऽहं करोमीत्यादिप्रतीतेः केवला
त्मविषयक प्रतीतिरननुभवात् परस्यात्मानुमीयते इत्याह प्रवृत्तीति ।
आत्मा परदेहादौ प्रवृत्त्यादिनानुमीयते प्रवृत्तिश्च चेष्टा ज्ञानेच्छाप्रयत्ना
प्राप४ दीनां देहेऽभावस्योक्तत्वाच्चेष्टायाश्च प्रयत्नसाध्यत्वाच्चेष्टया प्रयत्नवाना

धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः । प्रवृत्त्याद्यनु-
मेयोऽयं रथगत्येव सारथिः ॥ अहंकारस्याश्रयोऽयं मनोमात्र
स्य गोचरः । विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ॥

त्मानुमीयत इति भावः । अहंकारस्येति अहंकारोऽहमिति प्रत्ययस्तस्याश्रयो
टि३ विषय आत्मा न शरीरादिरिति मन इति मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविष
श्रे२ यः मानसप्रत्यक्षविषय इत्यर्थः रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात् विभु
रिति विभुत्वं परममहत्परिमाणवत्त्वं तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तम्

परकीयप्रवृत्त्यादेरतीन्द्रियत्वे हेतुज्ञानासंभवे त
त्वकरूपासिद्धिरित्याह २

अयं देहः प्रयत्नवदात्मसंयुक्तः चेष्टाव
त्त्वात् रथवत् १

३७ शिवोम्

अनुभवत्वं स्मृत्यन्यज्ञानत्वं स्मृतित्वं जातिविशेषः स्मरामीत्यनुव्यवसायात् तत्सिद्धिरिति
अनुभवत्वं जातिरित्यपि केचित् प्रत्यक्षमिति त्रुटिः ३

बुद्ध्यादीति बुद्धिसुखदुःखेच्छादयश्चतुर्दशगुणाः पूर्वमुक्ता वेदितव्याः अथै-
व प्रसंगाद्बुद्धेः कतिपयप्रपंचं दर्शयति बुद्धिस्तु द्विविधेति द्वैविध्यं स्मृत्यादय-
ति अनुभूतिरिति एतासां चतसृणां करणानि निरुक्तानि वेदितव्यानि

चत्वारि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति १

तत्रेन्द्रियजन्यं ज्ञानं प्रत्यक्षं यच्चापि मनोरूपेन्द्रियजन्यं सर्वमेव तत्

अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा
प्रत्यक्षमप्यनुमितिस्तथोपमितिशाब्दजे ॥

जन्यप्रत्यक्षमेव लक्ष्यमिति भावः ४ ईश्वरप्रत्यक्षालक्ष्यत्वस्यैवाभिप्रेतत्वादित्यर्थः ४

ने तथापीन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने करणत्वं तन्मात्रं प्रत्यक्षमिति विवक्षि-
तं ईश्वरप्रत्यक्षं तु न लक्ष्यं इन्द्रियार्थसन्निकर्षोत्पन्नमव्यपदेश्यमव्यभि-
चारि व्यवसायात्मकं प्रत्यक्षमिति सूत्रे तथैवोक्तत्वात् अथवा ज्ञानाकर-
णकं ज्ञानं प्रत्यक्षं अनुमितौ व्याप्तिज्ञानस्योपमितौ सादृश्यज्ञानस्य शाब्द-
बोधे पदज्ञानस्य स्मृतावनुभवस्य करणत्वान्न तत्रातिव्याप्तिः इदं लक्षणं १

ननु तस्यैव लक्ष्यत्वे किं मानमत आह इन्द्रियार्थेति ४
ईश्वरप्रत्यक्षस्यालक्ष्यत्वमभिप्रेत्याह ३

वह्निव्याप्यधूमवत्पर्वतवि
षयकज्ञानत्वानहम् २

वह्निव्याप्यधूमवान्पर्वतो वह्नि
मान् ३

कल्पितनिरूप्यजन्यहेत्वविषयके
त्यर्थः ३

३४ ३९

न्या॰मु॰

पक्षधर्मतापन्नत्ववैरोपलाय
वालक्षणंतरमाह ४

मीश्वरप्रत्यक्षसाधारणं तत्र परामर्शजन्यं ज्ञानमनुमितिः यद्यपि परामर्श
मत्यंत्वादिकं परामर्शजन्यं तथापि परामर्शजन्यं हेत्वविषयकं ज्ञानमनुमितिः
न त्वकादाचित्कहेतुविषयकानुमितावव्याप्तिः तादृशज्ञानस्यानुभवत्वव्या रितिवाच्यं ३
प्यजातिमत्वस्य विवक्षितत्वात् अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः
एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः पदज्ञानकरणकं ज्ञानं शाब्दबोधः

घटेतिव्याप्तिवारणाय घटत्वं तद्वृत्तित्वं समवायेन वि
वक्षितं तेनानुमितौ कालिकेन घटत्वस्य वृत्तित्वेपि
नातिव्याप्तिः ज्ञानत्वानुभवत्वादिकमादाय प्रत्यक्षाद
वतिव्याप्तिवारणाय विशेष्यदलम् ५

घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतं घ्राणस्य गोचरो गंधो गंधत्वादिर
पि तथा:

वंस्तु तोयं किंचिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षत्वावृत्तिजातिमत्व
मनुमितित्वं एवं यत्किंचित्प्रत्यक्ष दिकव्यक्तिमादाय तद्व्यक्तिवृत्त्यनुमि आदितोपमित्यादिः ४
त्वा त्यवृत्तिजातिमत्वं प्रत्यक्षत्वादिकं वाच्यमिति संक्षेपः जन्यप्रत्यक्षं विभ
जते घ्राणजादीति घ्राणजरासनचाक्षुषस्पार्शनश्रोत्रमानसमिति षड्विधम ३९
त्यर्थः नचेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वं जन्यप्रत्यक्षस्यैव निरूपणीयत्वात् श्रीरामः

उक्तसत्त्वानुसारात् गोचरइति ग्राह्यइत्यर्थः गंधत्वादिरित्यादिपदात्सुरभित्वादिप
रिग्रहः गंधस्य गन्धत्वस्याहृत्य जातिरपि गन्धवत्तां गंधाश्रयग्रहणेन तु घ्राणस्य न सा
मर्थ्यमिति बोध्यं तथा रसनेति रसत्वादिसहित इत्यर्थः तथा शब्दत्वादिसहित इत्यर्थः
रसगंधश्चोद्भूतो बोध्यः उद्भूतरूपमिति ग्रीष्मोष्मादावनुद्भूतरूपमिति न तत्स्यन्दे
तथा रसो रसज्ञायास्तथा शब्दोपि चश्रुतेः ५५ उद्भूतरूपं नयनस्य गोचरो द्रव्याणि
तद्वंति पृथक्त्वसंख्ये विभागसंयोगपरापरत्वे स्नेहोद्रवत्वं परिमाणयुक्तं ५६ क्रि
याजातियोग्यवृत्तिं समवायश्च तादृशं गृह्णाति चक्षुःसंबंधादालोकोद्भूतरूपयोः ५७
तद्वंति उद्भूतरूपवंतीत्यर्थः योग्येति पृथक्त्वादिकमपि योग्यव्यक्तिवृत्ति चक्षुर्योग्य वेयं तादृशे योग्यव्यक्तिवृत्तिः ४
त्वमेव कथं तदाह गृह्णातीति आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कार
णं तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसंबंधेन कारणत्वं द्रव्यसमवेतरूपादि
प्रत्यक्षे स्वाश्रयसमवायसंबंधेन द्रव्यसमवेतसमवेतरूपादेः प्रत्यक्षे स्वाश्रयसमवे ता १

तत्त्वगिंद्रियस्यापिग्राह्यं ३

३१ श्री न्या॰मु॰

गो॰
तत्समवायसंबंधेनेति उद्भूतस्पर्शवदिति उद्भूतस्पर्शवद्द्रव्यं त्वग्गोचरः सोपि उद्भूतस्प
र्शोपि स्पर्शत्वादिस्तत्त्वमिति इत्यर्थः रूपान्यदिति रूपभिन्नं रूपत्वादिभिन्नं यच्चतुर्वा च२
योग्यं तथा च पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्यगुणा उक्ताः एवं क्रिया जातयो योग्य
वृत्तयश्च ते वायुग्राह्या इति रूपमात्रापि कारणं द्रव्याध्यक्षे इति ग्रन्थापि त्वगिंद्रिय
जन्य द्रव्यप्रत्यक्षे रूपं कारणं तथा च बहिरिंद्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणं

उद्भूतस्पर्शवद्द्रव्यं गोचरः सोपि च त्वचः रूपान्यच्चतुर्वा योग्यं रूपमात्रापि का
रणं ५८ द्रव्याध्यक्षे

तथा तु बहिरिंद्रियजन्यद्रव्यप्रत्यक्षे रूपं न कारणं प्रमाणाभावात् किंतु चा
क्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे च स्पर्शः कारणमन्वयव्यतिरेकात् बहिरिंद्रि
मात्र३ यजन्यद्रव्यप्रत्यक्षे किं कारणमिति चेन्न किंचित् आत्मावृत्तिशब्दभिन्नविशे श्री
षगुणवत्त्वं वा जनकमस्तु रूपस्य कारणत्वे लाघवमिति चेन्न वायोस्त्वगिंद्रि शिवाम
येणाग्रहणप्रसंगात् इष्टापत्तिरिति चेन्न हि उद्भूतस्पर्शत्वेन लाघवात्कारण

त्वे।   त्वे२

ननु प्रभायाऽप्रत्यक्षत्वे तत्रापत्तिरिति किं न स्यात् तस्मात्प्रभां पश्यामीतिवद्वा
युं स्पृशामीति प्रत्ययसंभवात् वायोरपि प्रत्यक्षत्वं भवत्येव वहिर्द्रव्यप्रत्यक्षमात्रे
ऽद्भूतरूपस्य न वा स्पर्शस्य हेतुत्वं वायुप्रभयोरेकतरस्याप्रत्यक्षत एव किंचिद्दूरत्वादिकम
पि क्वचित्तं रूप्यापरिमाणाद्यग्रहो दोषादित्याहुः त्वचो योग इति त्वङ्मनःसंयो सं।४
गो ज्ञानसामान्ये कारणमित्यर्थः किं तत्र प्रमाणं सुषुप्तिकाले त्वङ्मनसोऽपुरी

त्वचो योगो मनसा ज्ञानकारणं

ततिवर्त्तमानेन मनसा ज्ञानजननमिति ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनु
ना।४ भवरूपं स्मरणरूपं वाद्यः अनुभवसामग्र्यभावात् तथाहि प्रत्यक्षे चक्षुरादिना स
ह मनःसंयोगस्य हेतुत्वात्तदभावादेव न चाक्षुषादि प्रत्यक्षं ज्ञानादेरभावान्मान
सं ज्ञानाद्यभावे चात्मनोऽपि न प्रत्यक्षं व्याप्तिज्ञानाभावादेव नानुमितिः सादृ
श्यज्ञानाभावान्नोपमितिः पदज्ञानाभावान्न शाब्दबोधः इत्यनुभवसामग्र्या

४॰
स्था॰पु
६०

भावान्नानुभवः उद्बोधकाभावान्न स्मरणमेवं सुषुप्तिप्राक्काले त्वगिन्द्रियादिमने
लसंबंधेनात्मनश्च मनसस्त्वक्संयोगात् तद्वतींद्रियेप्रमाणाभावात् सुषुप्तिप्राक्का
लेनिर्विकल्पकमेव नियमेन जायते अन्यत्रापिप्रमाणाभावात् प्रथमज्ञानमपे
पदित्वङ्मनःसंयोगस्यकारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं
स्यात् विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च तत्वात् परस्परप्रतिबंधादेक
मपिवानस्यादिति चेत् केचित् शर्बोत्कयुक्त्या त्वङ्मनोयोगस्य हेतुत्वे सिद्धे चाक्षुषा

मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ज्ञानं यन्निर्विकल्पाख्यं तत्
दतींद्रियमिष्यते

दिसामग्र्याः स्पार्शनादिप्रतिबंधकत्वमनुभवानुरोधात् कल्प्यत इत्यन्ये तु सु
षुप्त्यनुरोधेन चर्ममनोयोगस्य ज्ञाने हेतुत्वं कल्प्यं चाक्षुषादिप्रत्यक्षकाले त्वङ्म
नःसंयोगाभावान्न त्वाचप्रत्यक्षमिति मनोग्राह्यमिति मनोजन्यप्रत्यक्षविष
यत्वमर्थः मतिर्ज्ञानं कृतिर्यत्नः एवं सुखदुःखत्वादिकमपि मनोग्राह्यं एवमात्मा
पिमनोग्राह्यः किंतु मनोमात्रस्यगोचरः इत्यनेन शब्दयुक्तत्वादज्ञोक्तः ज्ञानमिति ४॰ द्विवोन

चक्षुःसंयोगाद्यनन्तरं घटइत्याकारकं घटत्वादिविशिष्टविषयकं ज्ञानं न संभवति पूर्वं वि
शेषणस्य घटत्वादेर्ज्ञानाभावात् विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् तथा च
प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते तदेव निर्विकल्पकं न च नि
र्विकल्पकं न प्रत्यक्षं तथा हि वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षं न संभवति घटमहं
जानामीति प्रत्ययात् तत्रात्मनि ज्ञानं प्रकारीभूय भासते ज्ञाने घटस्तत्र घटत्वं प्रका
रो यस्य विशिष्टविशेषणमित्युच्यते विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमि

महत्त्वं षड्विधे हेतुरिन्द्रियम्

त्युच्यते विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणं निर्विक
ल्पके च घटत्वादिकं न प्रकारः तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने
न संभवति घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न संभवति जात्यतिरिक्त
पदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनियमात् महत्त्वमिति द्रव्यप्रत्यक्षे महत्त्वं
समवायेन हेतुः द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवाये
न द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवा

यत्संबंधेन करणमिति इंद्रियमिति अत्रापि षड्विधः इत्यनुषज्यते इंद्रियत्वं तु न जातिः
पृथिवीत्वादिना संकरात् किंतु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकार
णमनःसंयोगाश्रयत्वमिंद्रियत्वं आत्मादिवारणाय सत्यंतं उद्भूतविशेषगुणश्रो
त्रेपि सत्वाच्छब्देतरेति विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्वादुद्भूतेति उद्भूतत्वं
न जातिः शुक्लत्वादिना संकरात् न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वा
च्यं उद्भूतरूपत्वादिना चानुगतेन जनकत्वानुपपत्तेः किंतु शुक्लत्वादिव्याप्यं नाने
वानुद्भूतत्वं तदभावकूटश्चोद्भूतत्वं तच्च संयोगादावप्यस्ति तथा च शब्देतरोद्भूतगुणः
संयोगादिश्चक्षुरादावप्यस्तीत्यतो विशेषेति कालादिवारणाय विशेष्यदलम्
इंद्रियावयवविषयसंयोगस्यापि प्राचांमते प्रत्यक्षजनकत्वादिंद्रियावयववा
रणाय मनःपदं नवीनमते कालादेरूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणी
भूतचक्षुःसंयोगाश्रयस्य कालादेर्वारणाय वा मनःपदं ज्ञानकारणमित्यपि तद्वा
रणाय करणमिति व्यापारवत्साधारणं कारणं व्यापारः सन्निकर्षः षड्विधः सन्नि

कर्षमुदाहरणद्वारादर्शयति द्रव्यग्रहस्त्विति द्रव्यप्रत्यक्षमिंद्रियसंयोगजन्यं द्र।
व्यसमवेतप्रत्यक्षमिंद्रियसंयुक्तसमवायजन्यं एवमग्रेपिवस्तुतस्तु द्रव्यचाक्षुषं
प्रतिचक्षुःसंयोगःकारणंद्रव्यसमवेतचाक्षुषंप्रतिचक्षुसंयुक्तसमवायः द्रव्य
समवेतसमवेतचाक्षुषंप्रतिचक्षुसंयुक्तसमवेतसमवायः एवमन्यत्रापि वि

करणंमतं ६० विषयेंद्रियसंबंधोव्यापारःसोपिषड्विधः
द्रव्यग्रहस्तुसंयोगात्संयुक्तसमवायतः ६१

शिष्यैवकार्यकारणभावः परंतुपृथिवीपरमाणुनीलेनीलत्वंपृथिवीपर
माण्वादौचपृथिवीत्वंचक्षुषाकथंनगृह्यतेतत्रपरंपरयोद्भूतरूपस्यमहत्व
स्यचसत्वात् तथाहिनीलत्वजातिस्त्वैवघटनीलेपरमाणुनीलेचवर्तते
तथाचमहत्वसंबंधोघटनीलमात्रएववर्ततेरूपसंबंधस्तूभयमादायैववर्त
ते एवंपृथिवीत्वेपिघटादिमादायमहत्वसंबंधोवाच्यः एवंवायोतदीयस्प

५२ न्या॰मु॰ 42

शब्दादौ च मनोयोगाद्यावश्यकं स्यात् तस्मादुद्भूतरूपावच्छिन्नमहत्वावच्छिन्नचक्षुस्सं।
युक्तसमवायस्य द्रव्यसमवेतचाक्षुषे नादृश्यावचक्षुस्संयुक्तसमवेतसमवायस्य
द्रव्यसमवेतसमवेतचाक्षुषे कारणत्वं वाच्यं अत्यंत च परमाणुनीलादौ नील।
त्वादिग्रहः परमाणौ च तु संयोगस्य महत्वावच्छिन्नत्वाभावात् एवं वाय्वादौ न स्प।
र्शादिचाक्षुषं तत्र चक्षुस्संयोगस्य उद्भूतरूपावच्छिन्नत्वाभावात् एवं यत्र घटस्यैक

द्रव्येषु समवेतानां तथा तत्समवायतः तत्रापि समवेतानां शब्दस्य समवायतः

देशावच्छेदेनालोकसंयोगश्चक्षुस्संयोगस्त्वन्यावच्छेदेन तत्र घटप्रत्यक्षाभावाद
लोकसंयोगावच्छिन्नत्वं चक्षुस्संयोगे विशेषणं देयं एवं द्रव्यस्पार्शने त्वक्सं।
योगः कारणं द्रव्यसमवेतस्पार्शने त्वक्संयुक्तसमवायः द्रव्यसमवेत
समवेतस्पार्शने त्वक्संयुक्तसमवेतसमवायः अत्रापि महत्वावच्छिन्न ५२ शिवाम
त्वमुद्भूतस्पर्शावच्छिन्नत्वं च विशेषणं देयं एवं गंधग्रहणे घ्राणसंयुक्तसम।

वायः गंधसमवेतप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः रसप्रत्यक्षे रसनसंयुक्तस
मवायः रससमवेतरासनप्रत्यक्षे रसनसंयुक्तसमवेतसमवायः शब्दस्येति शाब्द
प्रत्यक्षे श्रोत्रावच्छिन्नसमवायः तद्वृत्तीति शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रा
वच्छिन्नसमवेतसमवायः ॥ अत्र सर्वप्रत्यक्षं लौकिकं बोध्यं वक्ष्यमाणमलौकि
कमिंद्रियसंयोगं विनापि भवति एवमात्मप्रत्यक्षे मनःसंयोगः ॥ आत्मसमवेत।
तद्वृत्तीनां च समवेतसमवायेन तु ग्रहः विशेषणतया तद्वदभावानां ग्रहो भवेत् इद
मानसे मनःसंयुक्तसमवायः ॥ आत्मसमवेतसमवेतमानसे मनःसंयुक्तसमवेतस
मवायः करणं ॥ अभावानामिति समवायप्रत्यक्षे अभावप्रत्यक्षे चेंद्रियसंबद्धविशे
षणता हेतुः वैशेषिकसमवेतसमवायो न प्रत्यक्षः यत्र यद्यपि विशेषणता ना
नाविधा तथापि भूतलादौ घटाभावः संयुक्तविशेषणतया गृह्यते संख्यादौ

४३ न्या॰मु॰ 43

वरूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया शब्दाभावः केवलं श्रोत्रा
वच्छिन्नविशेषणतया ककारादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेष
णतया एवं कत्वादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतसमवेतविशेषण
तया एवं कत्वावच्छिन्नाभावे खत्वाभावादिकं विशेषणविशेषणतया घटा।
भावादौ घटाद्यभावः संयुक्तविशेषणविशेषणतया एवमन्यत्राप्यूह्यम्
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते प्रत्यक्षं समवायस्य विशेषणतया भवेद्॥६॥
तथापि विशेषणतात्वेनैव समागम्यते अन्यथा घटोद्दाम सन्निकर्षोऽतिप्रसंगवादे
र्याह यत्र यदि स्यादिति अभावप्रत्यक्षे योग्यानुपलब्धिः कारणं तथाहि भूतला
दौ घटादिसत्त्वे ज्ञाते घटाभावादिकं न ज्ञायते तेनाभावोपलम्भे प्रतियोग्यनुपलम्भा।
भावः कारणं तत्र योग्यता च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जित प्र

४३ शिवोम्

तियोगिकत्वरूपा तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्रसञ्जनापादितः उपलंभ-
वः प्रतियोगी यस्य सत्त्वे उपलंभाभावो ऽभावप्रत्यक्षे हेतुः तथा हि यत्रालोकसंयो।
गादिकं वर्तते यद्यत्र घटः स्यात् तर्ह्युपलभ्येतेत्यापादयितुं शक्यते तत्र घटाभा।
वादेः प्रत्यक्षं भवति अंधकारे तु नापादयितुं शक्यते तेन घटाभावादेरंधकारे न चा
क्षुषप्रत्यक्षं स्पार्शनप्रत्यक्षं तु भवत्येव आलोकसंबंधं विनापि स्पार्शनप्रत्यक्ष।
स्यापादयितुं शक्यत्वात् गुरुत्वादिकं पदयोग्यं तदभाववस्तु न योग्यः तत्र गुरुत्वा
दिप्रत्यक्षस्यापादयितुमशक्यत्वात् वायावुद्भूतरूपाभावः पाषाणे सौरभाभा
वः गुडे तिक्ताभावः वह्नावनुष्णत्वाभावः आत्मनि सुखाद्यभावः एवमादयस्तत्तदि
न्द्रियैर्गृह्यंते तेन तदधिकरणे तत्प्रत्यक्षस्यापादयितुं शक्यत्वात् संसर्गाभावप्रत्यक्षे
प्रतियोगिनो योग्यता अन्योन्याभावप्रत्यक्षे ऽधिकरणयोग्यता ऽपेक्षिता अतः।
स्तंभादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यते एवं प्रत्यक्षं लौकिकालौकिकभेदेन

४८ द्विविधं तत्र लौकिकप्रत्यक्षे षोढासन्निकर्षा उक्ताः। अलौकिकसन्निकर्षो निरू।
न्या॰मु॰ नीपयति अलौकिक इति व्यापारः सन्निकर्षः सामान्यलक्षण इति सामान्यं।
५५ लक्षणं यस्येत्यर्थः तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपं प्रत्या
सत्तिरित्यर्थो लभ्यते तत्त्विन्द्रियसंबद्धविशेष्यकज्ञाने प्रकारीभूतं बोध्यं तथा
हि यत्रेन्द्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं जातं तत्र ज्ञाने धूमत्वं प्रका
अलौकिकस्तु व्यापारस्त्रिविधः संप्रकीर्तितः सामान्यलक्षणो ज्ञानलक्षणो योगज
स्तथा॥
जा
रं तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवंरूपं सकलधूमविषयकं ज्ञानं जायते यद्य
दिन्द्रियसंबद्धप्रकारीभूतमित्येवोच्यते तदा यत्र धूलीपटले धूम इति ज्ञानं तत्र
तेन सन्निकर्षेण सकलधूमविषयकं न स्यात् तत्र धूमत्वेनेन्द्रियसंनिकर्षबंधाभा। ४८
वात् तन्मते त्विन्द्रियसंबद्धं धूलीपटलं तद्विशेष्यकं धूम इति ज्ञानं प्रकारीभूतं धूम शिवोम्
त्वं प्रत्यासत्तिः इन्द्रियसंबंधश्च लौकिको ग्राह्यः इदं च बहिरिन्द्रियस्थले मानस

स्यतेनुज्ञाने प्रकारीभूतं सामान्यं सन्निकर्षः परंतु समानानां भावस्सामान्यं न तु
क्वाचित्कित्वं धूमत्वादिकं किंचानित्यं घटादि यत्रैको घटसंयोगेन भूतले स
मवायेन कपाले वा ज्ञातस्तदनंतरं सर्वेषामेव तद्घटवतां भूतलादीनां कपा।
लानां च ज्ञानं भवति तत्रेदं बोध्यं परंतु सामान्यं येन संबंधेन ज्ञायते तेन संबं
धेनाधिकरणानां प्रत्यासत्तिः किंतु यत्र तद्घटनाशानंतरं तद्घटवतां स्मरणं
जातं तत्र सामान्यलक्षणया सर्वेषां तद्घटवतां भानं न स्यात्सामान्यस्य तदा
नीमभावात् किंचेंद्रियसंबद्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने
इंद्रियसंबंधं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्वात्तादृशं ज्ञानं
कुतो न जन्यते तस्मात्सामान्यज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह प्रास।
त्तिरिति प्रत्यासन्निरित्यर्थः सामान्यज्ञानमिति तथा च सामान्यलक्षण
त्यत्र लक्षणशब्दस्य विषयोर्थः तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरि।

४५
न्या·मु·
45

न्यधीर्लभ्यते ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्त्तते तत्र स
कलघटादीनां प्रत्यक्षं स्यादत आह तदिन्द्रियजेति । अस्यार्थः यदा बहिरि
न्द्रियेण सामान्यलक्षणया सकलघटादीनां ज्ञानं जननीयं तदा यत्किंचि
द्धर्मेण सामान्यस्य तदिन्द्रियजन्यज्ञानसामग्र्यपेक्षिता सा च सामग्री च
क्षुःसंयोगालोकसंयोगादिकं तेनान्धकारादौ चक्षुरादिना तद्धर्मज्ञानेन ज
॰ आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते तदिन्द्रियजतद्धर्मबोधसाम
ग्र्यपेक्ष्यते ह्यदः
न्यते ननु ज्ञानलक्षणा प्रत्यासत्तिर्यदि ज्ञानरूपा सामान्यलक्षणापि
ज्ञानरूपा तदा तयोर्भेदो न स्यादत आह विषयीति सामान्यलक्षणा
प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति ज्ञानलक्षणा तु यद्विषयकं ज्ञा
नं तस्यैव प्रत्यासत्तिरिति । अत्रायमर्थः प्रत्यक्षे सन्निकर्षं विना भानं न
संभवति तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नि ४५ शिवोम

त्वेन सकलवह्नीनां भानं कथं भवेत् तदर्थं सामान्यलक्षणा स्वीक्रियते न च सक
लवह्निधूमभानाभावे का क्षतिरिति वाच्यं प्रत्यक्षधूमे वह्निसंबंधस्य गृहीतत्वात्
॰न्यधूमस्य चानुपस्थितत्वात् धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः मन्मते
तु सामान्यलक्षणया सकलधूमोपस्थितौ कालांतरीयदेशांतरीयधूमे व
ह्निव्याप्यत्वसंदेहः संभवतीति भावः न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन

विषयीभूतस्य तस्यैव व्यापारो ज्ञानलक्षणा

सकलप्रमेयज्ञाने जाते सार्वज्ञापत्तिरिति वाच्यं प्रमेयत्वेन सकलप्रमेयज्ञा
ने जातेपि विशिष्य सकलपदार्थानामज्ञाततेन सार्वज्ञ्याभावात् एवं ज्ञा
नलक्षणाया अस्वीकारे सुरभि चंदनमिति ज्ञाने सौरभभानं कथं स्यात्
यद्यपि सामान्यलक्षणयैव सौरभभानं संभवति तथापि सौरभत्वस
ज्ञानं ज्ञानलक्षणया एवं पर्वतो धूमवत्त्वेन धूलीपटलं ज्ञातं तत्र धूलीपटलस्यानुम्य

४६ न्या॰मु॰ 46

वस्मायेभानंतानलक्षणया। योगजइति योगोऽभ्यासजनितोधर्मविशेषःश्रु
तिस्मृतिपुराणादिप्रतिपाद्यइत्यर्थः युक्तस्येति युक्तयुंजानरूपयोगिद्वैवि।
ध्याद्धर्मस्यापिद्वैविध्यमितिभावः युक्तस्यतावद्योगजधर्मसहायेनमन
साऽऽकाशपरमाण्वाद्यखिलपदार्थगोचरं ज्ञानंसर्वदैवभवितुमर्ह

योगजोद्विविधःप्रोक्तोयुक्तयुंजानभेदतः
युक्तस्यसर्वदाभानंचिंतासहकृतोऽपरः

तिद्वितीयस्यचिंताविशेषोपिसहकारीति॥इतिश्रीमुक्तावल्यांप्रत्य
क्षखण्डःसमाप्तिमगात हरिःॐतत्सत् श्रीसिद्धिदेवतायेनमः
हरिहरंविधातारंयःपश्यन्त्येकरूपिणंसयातिपरमानंदंशास्त्राणामे
षनिश्चयः॥१॥

४६ प्रीवाम